॥श्रीगणेशायनमः॥ ॥ॐनमः श्रीमहावीरजिनेंद्राय परात्मने॥ परब्रह्मस्वरूपाय जगदानंददायिने॥१॥ सार्वाः सर्वे प्रकुर्वंतु करस्थाः
सुखसंपदः॥ स्वनामस्थापनाद्यैर्भावैः पावितविष्टपाः॥२॥ जीयात्स श्रीगुरुः स्वर्णः सदास्तु दयनासुरः॥ यस्यवाचः प्रभाशास्वदिश्वना
सनलालसाः॥३॥ सुमनः सुमनो भृंगी संगीतगुणवेनवाः॥ सरस्वती जगन्माता भूनी पान्मे सरस्वती॥४॥ नृवासवा वनृवांसो नृपाःसोपिप्र
भावकाः॥ श्रावकाः श्रेणिकाद्याः श्रीजिनाज्ञापालकाः परे॥५॥ जगदद्भुतमारिकारकत्वादिकैर्गुणैः॥ कुमारक्ष्मापतेः कोपितुल्यां प्राप
नृपतिः॥६॥ युग्मं॥ उक्तंच॥ आज्ञावर्त्तिषु मंडलेषु विपुलेष्वष्टादशस्वादरा॥ दशान्येवं चतुर्दश प्रसभमरीमारिं निवार्योजिसा॥ कीर्त्तिस्तंभ
निभाश्चतुर्दशशतीसंख्या न्विहाराः सथा॥ कृत्वा निर्मितवान्कुमारनृपतिर्जैनो निजेनोव्ययं॥१॥ तथा॥ समुच्छिदं न्मारिं समितिनिभृणः
प्रास्तकुनयः क्षमापालः श्रेयानऽदितविषयग्रामविजयी॥ विहारैर्नृत्कामकृतंकृतबह्वर्थनिवय श्चिरं हेमाचार्यप्रभुरथ कुमारो नरपतिः
॥२॥ ततश्चौलुक्यवंशेकमौक्तिकस्य महौजसः॥ श्रीहेमचंद्रसूरींद्रपदपद्मोपसेविनः॥७॥ जिनधर्मरसावेशोल्लसद्भासितचेतसः॥ कृपैकप्रा
णनाथस्य प्रराईत शिरोमणेः॥ राज्ञः कुमारपालस्य स्वरसात्तद्भुपया॥ संबंधयोजनार्थं प्रबंधं ब्रुवेकिंचन॥८॥ विविधविशेषकैस्तत्र वंशाः प
रत्रिंशदेव॥ इक्ष्वाकुवंश१ सूर्यवंश२ सोम३ यादव४ परमार५ चाहमान६ चौलुक्य७ छिंदक८ सिलार९ सैंधव१० चापोत्कट११ प्रतीहार१२ चंदुक
१३ राठ१४ रूपट१५ शाक१६ करक१७ पाल१८ करंक१९ चाउल२० गुहिल्ल२१ पुत्र२२ पोलिक२३ मौरिक२४ मंकुयाणक२५ धान्यपालक२६ राजपा
लक२७ अमंग२८ निकुंभ२९ दधिलक३० तुरुदलियक३१ हूण३२ हरियड३३ वन३४ माष३५ पोषर३६ नामानः॥ तेषु चौलुक्यवंशे षट्त्रिं
शच्छत्रकृ यामाराम कान्यकुब्जदेशे कल्याणकटकपुरे॥ श्रीभूयडराजा राज्यं करोति तेनराज्ञा स्वपुत्र्या मदणलदेव्या गुर्जरधरित्री कंचुकपदे
दत्ता॥ इतश्च गुर्जरदेशैकदेशे वडियारदेशे पंचासरग्रामे वह्निप्रदेशे श्रीशीलगुणसूरिः शकुनावलोकनार्थं प्राप्ता वनगहनमध्ये वृक्षशाखानिबद्ध
झोलिकां बालकमेकं दृष्ट्वा समीपस्थां तन्मातरमूचुः॥ कस्यैकाऽसि त्वं॥ तयोक्तं अहं राजपत्नी कान्यकुब्जीय श्री भूयराजतनयेन चापोत्कटकुलक
कु०प्र० मलवर्धीरस्य कुमारस्य गोपनार्थ अत्र स्थितास्मि ततः श्रीसूरिभिः परा केपि तद्रूप्या पार्श्वमनमितामालोक्य कोप्ययं महानरेश्वरो भावीति तत्स ॥१॥
रूपं श्राद्धनाम वेद्या तस्यपरीक्षा कारिता सवा बालकः श्रीगुरुदत्तवनराजनामा ऽष्टवार्षिको राजविक्रिः श्रीउत्पलबालकाऽऽस्यतेजाः समभूत
ततः श्राद्धैर्मातुः समर्पितः सन् सचोरो मातुलेन सह श्वाऽऽदो परिभ्रमन्नन्यदा काकरग्रामे धनिगृहे खात्रं दत्वा प्रविष्टो दधिभांडे करे पतिते भुक्तो
ऽहमत्रेति सर्वं हित्वागतः॥ प्रातस्तत्तु श्रीदेवीगोरसे हस्तांगुलिविक्रान्ति॥ एतन्नृतानिदृष्ट्वा कोप्ययं महाभुरुषो नागच्छतीति तं बांधवत्वे
नप्रतिपद्य तं दृष्ट्वाऽस्त्वामीति॥ कृतप्रतिज्ञया तत्स्वरूपमाकर्ण्य शेरासमागतो वनराजो युग्महत्या॥ भोजनवस्त्रादिना सत्कृतो मम राज्याभि
षेककाले त्वयैव भगिन्या तिलकः कार्य इति प्रतिज्ञाय गतः॥ अन्यदा वनराजेन क्वापि वने जांबाकीवणिक् रुद्धः॥ शरपंचक मध्याच्छरद्वयं॥

नृभो मुंचन् द्वे इत्थं कारणं प्राह यत्त्रयोजनाः शरास्तत्पंच तेन द्वास्तां मधिकास्तां किं प्रयोजनमिति पृष्टे कोप्ययं सत्त्ववान् ईश्वरः भगा
न्मम राज्यकाले महामात्यो भावीति मुक्तो जांबाकः कृतप्रणामः किमपि द्वयं वस्त्रादिकं दत्वा गतः॥ एकदा गुर्जरत्रा पंचकुलं षण्मासे रुद्ध
हितसुराष्ट्रमंडलं २४ लक्ष हेममाणकान् ४०० जात्यतुरंगमान् लात्वा आयुस्समानं पथि वनराजेन दत्वा सर्वं जगृहे ततोवर्षं यावत्काखुला
रवने स्थितिं कृत्वा कान्यकुब्जराज्यस्थितिरुत्थापिता ततो नवीनपुर निवेशाय भूमिं विलोकयता वनराजेन ऽणहिल्लनाम गोपः प्राप्तस्ते
नयत्र शशकेन श्वा त्रासितः स तस्यानंद दर्शितिं नेतस्तन्नाम्ना अणहिल्लपुरं पत्तनं सकलवास्तुविद्याविचारपुरः सरप्राकार प्रतोली परिखा प्रासा
द विहार हर्म्य हस्तिशाला तुरंगमशाला दानशाला सत्रागार पानीयशाला भांडागार कोष्ठागार शस्त्रशाला राजसभा ऽलंकारसभा स्नानगृ
ह भूमि धर्मशाला पानीयशाला नाट्यगृह क्रीडनगृह शांतिगृह शल्यशाला वैद्यशालादिभिर्विशालं स्थापितं ततः पंचाशद्वर्षवयसो वन
राजस्य राज्याभिषेकः श्रीपत्तने ८०२ वर्षे श्रीशीलसूरिभिर्जिनमंत्रैः राज्यस्थापना कृता तदा पूर्वप्रतिपन्न भगिन्या तिलकश्चक्रे तस्याः प्रसाद
सादः जांबाकः सर्वराजकार्यक्षमो महामात्यः समभूत॥ श्रीगुरूपदेशेन राजा वनराजः पुण्यवान् कृतः ततः पंचासरग्रामे श्रीपार्श्वनाथप्रति
मालंकृतं निजाराधकमूर्त्तियुतं प्रासादमचीकरत्॥ गुर्जराणामिदं राज्यं वनराजात्प्रभृत्यपि॥ स्थापितं जैनमंत्रैस्तत् तद्द्वेषी नैव नंदति॥१॥ इ
तिलोके प्रसिद्धिरभूत्॥ ततः ६० वर्षं वनराजराज्यं ३५ वर्षाणि तत्पुत्रयोगराजराज्यं २५ वर्षं क्षेमराजराज्यं २९ वर्षं भूयडराज्य राज्यं २५ वैरसिंह
राज्यं १५ वर्षं रत्नादित्यराज्यं ७ सामंतसिंहराज्यं एवं चापोत्कटकुले सप्तराजानो ऽभूवन् एवं वर्ष १९६ ततो दौहित्रसंताने चौलुक्यकुले राज्यं
गतं कथं गतं तदुच्यते॥ कान्यकुब्जीयचौलुक्य श्रीभूयडराजस्य सुतः कर्णादित्यः तत्पुत्रश्चंद्रादित्यः तत्सुतः सोमादित्यः तत्पुत्रो भुवनादित्य
स्तस्य राज बीज दडक नामानस्त्रयः पुत्राः तेषु प्रथमो राजकुमारः दीसइ विविहचरियं जाणिज्जइ सुयणदुज्जणविसेसो अप्पाणं च कलिज्ज
इ हिंडिज्जइ तेण पुहवीए॥१॥ इति विचार्य देशांतरे परिभ्रमन् सोमनाथयात्रां कृतवान् तत्र वलमानः पत्तने गत्वा सामंतसिंहनृपं वाह्यालीवाहे
वीक्षणि ग्रहः कार्य इति सोमनाथवचसा श्रीपत्तने समायातः सामंतसिंहनृपं वाहकेलीकुर्वंतं दृष्ट्वा ऽश्वघाते राजा दत्ते राजकुमारो ऽनवस
रदत्तेन कशाघातेन पीडितो हाहेति शब्दमकरोत् राज्ञा कारणं पृष्टो ऽवदत् देव अश्वे कृतशोभनगतो कशाघातो मम मर्माभिघातः संजातः
॥ ततो राज्ञा तस्यार्पितोऽश्वः तेनवाश्वशिक्षाकुशलेन दर्शितौ वाहकेली कौतुकं जातस्तयोः सहशो योगः यतः॥ अश्वः शस्त्रं शास्त्रं वाणी
वीणा नरश्च नारी च पुरुषविशेषं प्राप्ता भवंत्ययोग्याश्च योग्याश्च॥१॥ ततः सामंतसिंहेन नृपेण चारादिभिर्महत्कुलमाकलय्य राजकुमारस्य
महता प्रहेण लीलादेवीनाम्नी स्वभगिनी ददे अन्यदा काला तरेसाप्यापन्नसत्वा जाता तस्याः अकाण्डमरणे सचिवैः कुक्षं विदार्य कर्षितिमपत्यं मूलन ऽममय

सचे जातत्वान्मूलराजोऽयमिति॥ नाम कृतं॥ लोके ऽयो नीमं नवत्वेन चमत्कारकारी तज्जन्मतो राज्यादि दृष्टिं दृष्ट्वा मदमत्तेन सामंतसिंहेन सराज्ये ऽ
भिषिक्तो गतमदेन तेनोत्थाप्यते॥ तदादि चापोत्कटानां दानमुपहासपदं जातं लोके यत्र तद्वाउडानी दानी ति॥ एकदा मदमत्तेन स्थापितो राज्ये मूलराज
स्तेनैव विकलो ऽयं मातुल इति विज्ञानी नो गृहीतं स्वयमेव राज्यं॥ ९९८ वर्षे जातो राज्याभिषेकः॥ स्वातुलबलपराक्रमः प्रतापाक्रांतसकलसीमाल
भूपालः स्वबलेन लाषाकं नृपं जितवान् तत्स्वरूपं यथा॥ परमारवंशे कीर्त्तिराजसुता कामलता शैशवे सखीभिः सह रममाणा थकारे प्रासादस्तंभां
तरितं फूलडानिधं पशुपालं वृत्वा ततः कतिपयैर्वर्षैः प्रधानवरेभ्यो दीयमाना पतिव्रताव्रतपालनाय तमेवोपयेमे तयोः पुत्रो लाषकः स
वकच्छाधिपः सर्वतोप्यजेयः एकादश कृत्वस्त्वामित मूलराजसैन्यः॥ एकदा कपिलकोटे स्थितो मूलराजेन रुद्धो दुर्गं कुर्वाणस्तस्या जेयतां
दिनत्रयेण विमृश्य तुर्यदिने निजकुलदेवतमनुस्मृत्य ततो ऽवतीर्णदेवतकलया लाषाको निजघ्ने तस्याजो नृपतितस्य वातचलितेश्मश्रु
णि पदं स्पृशन् मूलराज स्तज्जनन्या पतिव्रता व्रतपतिश्रया लूतारोगेण नवदंपत्य विनश्यंतु इति शप्तः मूलराजः॥ ५५ वर्षाणि राज्यं कृत्वा
॥ एकदा सो ऽथनी राजतानंतरं तां झूले कृमिदर्शनात् गजादिदानं दत्वा सम्यास पूर्वं दक्षिणचरणांगुष्ठे वह्निमोक्षणं कृत्वा ऽश दश शरैः परलो
कमगात्॥ ततो वर्ष १३ चामुंडराज्यं मास ६ वल्लभराजराज्यं वर्ष ११ मास २ दुर्लभराजराज्यं तस्य पुत्रं श्रीभीमं राज्ये संस्थाप्य स्वयं वैराग्यवान् तीर्थ
यात्रां कुर्वन् मालवकं गतः॥ श्रीमुंजेन छत्रादिकं मुंच मुंच वा कुरु इत्युक्तो धर्मांतरायं मत्वा प्रकामवान् कार्पटिकवेषेण यात्रां कृत्वा परलोक
मसाधयत तत्स्वरूपं भीमेन ज्ञातं ततः प्रभृति राजद्वयविरोधः॥ भीमस्य द्वे राज्ञी बकुलदेवी तस्याः पुत्रः क्षेमराजः॥ द्वितीया उदयमती तस्याः
सुतः कर्णदेवः तौ परस्परं प्रीतिभाजौ यथा रामलक्ष्मणौ॥ अन्यदा कर्णमात्रा तोषितेन भीमेन तयोरपि कर्णस्य राज्यं प्रतिपन्नं ४२ वर्षाणि राज्यं कृत्वा
भीमे दिवं गते सति भोदर्यवीर्यगांभीर्यप्रज्ञाबुद्धिगुणोत्तमं राज्य क्षेमे क्षेमराजे कर्णो राज्यं न वांछति॥ १॥ रामइव क्षेमराजः स्मृत्वाज्ञां पितुस्ततः॥ कर्णम
रोपरोधेन स्वयं राज्ये न्यवीविशत्॥ २॥ अथ तेनोभौ कर्णदिर्लोके ख्यातं तस्यैका राज्ञी मयणल्लदेवी तस्या एवं स्वरूपं कर्णाटदेशे जयकेशी राजा त
स्य सुता मयणल्लदेवी कुरूपा साप्यन्यदा पितुः पार्श्वस्था सदसि सोमेश्वरयात्रिकैः सोमनाथयात्रास्वरूपे कथ्यमाने सर्वं निवमस्मार्षीत्॥ यदहं पूर्व ॥२॥
भवे ब्राह्मणी द्वादशमासोपवासान् कृत्वा प्रत्येकं द्वादशवस्तूनि॥ तदुद्यापने दत्वा सोमनाथयात्रां कर्तुं व्रजंती बाहुलोडनगरं प्राप्ता तत्रत्ये करं दा
तुमक्षमा प्रतीगमलत्वमाना वाहमासामिनवे ऽस्य करस्य मोचयित्री स्यामिति कृतनिदाना विपन्ना राज्ञः सुता जाता तदनु जातिस्मरणवती
बाहुलोडकरमोचनाय गुर्जरेश्वरं श्रीकर्णं वरं कामयमाना पितुः स्वरूपं निवेदितवती॥ जयकेशी राज्ञा श्रीकर्णाय दत्तासीत् तस्याः कु
रूपतां निशम्य तस्यां मंदादरो ऽभूत् एतत्तातास्वसुतायास्तस्मिन्नेव निर्बंधपरतां च विज्ञाय तामेव स्वयंवरां कोटिस्वर्णद्विसहस्रजाल

तुरंगवक्रप्रधानादिभोदसामग्र्या पत्तने प्रहिणोत् जयकेशिनृपः॥ गुर्जरेश्वरस्य श्रीकर्णस्तस्या स्तादृक् कुरूपतां स्वयं विचिन्त्य त
त्परिणयने निरादरो ऽजनि ततस्तया सा कुब्जादिकन्याभिरिव मूर्तिमतीभिरष्टाभिः सखीभिः सह नृपतये स्वहत्याप्रदानाय अग्निप्र
वेशमहः प्रारब्धः॥ अथ श्रीकर्णमात्रा श्री उदयनमतिराज्ञा॥ तासां विपदं दृष्ट्वा मत्कृते मया ताभिः सह प्राणत्यागसंकल्पश्चक्रे॥ यतः
॥ स्वापदि तथा महतां नयां भिरवेदं यथा परापत्सु॥ अचलानिजोपदतिश्च प्रकंपते नूः परव्यसने॥ १॥ इति मातुः कदाग्रहा देवा ऽ
निच्छुनापि श्रीकर्णेन सा परिणिन्ये॥ जनकृत मातुलकरणी परणीय च॥ परित्यक्ता दृग्मात्रेणापि न तां संभावयति॥ अन्यदा
गीतगायनमातंग्याः सुरूपाया रात्रौ ऽभिलाषी सति॥ मातंगी रूपं कारयित्वा सैवा ऽमात्यैः श्रीमुंजालादिभिः सदृशवयोरूप
वेषयुक्ता प्रेषिता ततः पश्चात्तापे सद्भावे प्रोक्ते राजा हृष्टः॥ तत्कुक्षिसंभवो जयसिंहदेवः पुत्रो जातः त्रिवार्षिकः सन् रा
जसिंहासने स्वयमलंचक्रे राज्ञा दृष्टे नैमित्तिकैर्महामुहूर्त्तमधुनेति कथिते॥ जयसिंहदेवस्य राज्याभिषेकः कृतः॥ पालयत्यस्म
दाराज्यं जयसिंहे नरेश्वरे॥ वबालदेवयात्रायां कर्णः कर्ण इवापरः॥ १॥ श्री देवपत्तनाद वर्गिवर्ते सप्तभिः स्थितः॥ प्रासादं सोमनाथ
स्य दृष्ट्वा निग्रहमग्रहीत्॥ २॥ यथा पापरूपं दारं वज्रादितारकं कुंडलं॥ श्रीतिलकमंगदं वा परिधाय समाहितः॥ ३॥ यदा सोमेश्वरं
देवं श्रजयिष्यामि भक्तितः॥ भोक्ष्ये तदा ऽन्नपानं संबलमपि नान्यथा॥ ४॥ स्नात्वा प्रत्नासे श्रीकर्णो यदा यात तनूषणं॥ कोशाध्यक्षस्तदास्मा
दनादिष्टो स्वामिभिस्तदा॥ ५॥ आभरणं पत्तने ऽस्यात्तं विषल्लश्च ततो नृपः॥ तदा मदनपालाख्यो मंडलीको ऽब्रवीदिति॥ ६॥ मा विषाद
महाराज मंत्रसिद्धिधरायतः॥ मयासौ तिसदानीताः श्री धनेश्वरसूरयः॥ ७॥ ततो ऽभ्यर्थनया राज्ञस्तेन दिक्पत्तनात्॥ आकृष्टिमंत्रे
णाकृष्याभरणं तत्समर्पितं॥ ८॥ संकर्ण्य निग्रहो राजा प्राह सूरिवरं प्रति॥ युष्माभिर्जीवितं दत्तं मम माभिग्रहपूरणात्॥ ९॥ गृहाण तदिदं
राज्यमित्युक्तः सूरिरब्रवीत्॥ रक्षजीववधं राजन्नवरात्रदयेपिहि॥ १०॥ तथेतिकृत्वा संसाध सुराष्ट्रामंडलं नृपः॥ चकार वामन
स्थल्यां सज्जनं दंडनायकं॥ ११॥ ततो मदनपालेन वित्तसः कर्णनृपतिः॥ सार्द्धं धनेश्वराचार्यैरारूढो रैवताचलं॥ श्री नेमिजिनवनं जीर्ण
वीक्ष्य काश्मयं ततः॥ सज्जनो गुरुणादिष्टो जीर्णोद्धारकृते सति॥ १३॥ सज्जनोपि स्वगुरुभिः श्री धनेश्वरसूरिभिः॥ चतुर्विधेन संघे
न सार्द्धं राजानमन्वगात्॥ १४॥ माणिक्य हेमरत्नाद्यैः प्रासादान्कारयंति ये॥ तेषां स्वल्पैकसूत्रे ऽनंतकोटीवेदफलमुत्तमं॥ १॥ काष्ठादी
नां जिनावासे यावंतः परमाणवः॥ तावंति वर्षलक्षाणि तत्कर्ता स्वर्गभाग्भवेत्॥ २॥ युक्तमिदमुपदेशकथनं साधूनां॥ यतः॥
तथा न वी नगीदस्य विधाने यत्फलं लभेत्॥ तस्मादष्टगुणं पुण्यं जीर्णोद्धारेण जायते॥ ३॥ जीर्णोद्धाराय विज्ञप्तः सज्जनेन नृपस्ततः

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

सुराष्ट्रे श्रादिनं दत्वाऽछदिक्त्रपुरमाययौ॥१॥ अथ नंदिसूर: सूरि: सज्जनेन सहाष्टमं। तप: कृत्वांबिकादेवीमाशानयददीनधी:॥ प्र
सन्नीभूयसापृष्टेयुवाभ्यां किमहं स्मृता॥ सूरिराह नेमिचैत्यमुद्धरिष्यति सज्जन:॥३॥ तदेनमनुजानीहि पापाणरवनिमादिश॥ अंबापृष्टे न
वत्वैतदत्यायु: सज्जन: पुन:॥४॥ दंडाधिप: प्राह कार्यस्तीर्थोद्धारो विशेषत:॥ परलोकप्रस्थितानां पाथेयं धर्म एव यत्॥५॥ दीपेस्नापतितैः
लहरणविधिस्तोयं कुमेच्छप्पति॥ प्रावारो हिमसंगमे जलगृहं ग्रीष्मज्वरो ज्जागरे॥ निर्वृतिं कचवं द्वारक्षतिकरे रोगो ह्यवेनेषजं॥ धर्मस्तुम
हान्नयेसतिमतां संमेवितुं युज्यते॥२३॥ अंबानुज्ञातनील ज्ञापापाणस्यरवनिं वस:॥ श्रीनेमिचैत्यं संघ एषास्यां कलशांतमकारयत्॥२४॥ स्येष्ट
स्यसितपंचम्यां त्रिंशे ऽत्यमिंाथ सज्जन:॥ अंबादेवि वच: स्मृत्वा जातपंचत्वनिश्चय:॥२५॥ आदिष्टपरस्त्ररामं स्वपुत्रं ध्वजरोपणे॥ नंदेश्वर
गुरो: पार्श्वे संस्तारव्रतमग्रहीत्॥२६॥ दिनाष्टकं पालयित्वानशनं सज्जनो मुनि:॥ दिवं जगाम पुत्रोस्य ध्वजारोपं अधापयत्॥२७॥ अ
त्रावसरे श्रीकर्णराजो द्वयोराज्ञोर्नैकत्रावस्थानं युक्तमिति॥ आशापल्लीं निवासिनं॥ प्रबलभुजबलिनं लक्षं निहत्य युतं॥ आसाकं
निहत्य जित्वा कर्णावतीं पुरीमथाय्य १८ वर्षाणि राज्यं कृत्वा पंचत्वमगात्॥ अत्रांतरे परस्त्ररामेणा विंति॥ राजा जयसिंहनामा दंडशोध
यिष्यति॥ तदा किं ना वीति॥ विचिंत्य वामनस्थली निवासयित्व व हारिणाम ग्रे कथितं। तैरपि तद्दंडदानं प्रतिपन्नं॥ अथ पंचत्वमा
पन्ने कर्णदेवे मंडपती॥ श्रीमान् जयसिंहदेव: स्वयं राज्यमपालयत्॥३०॥ तत: समुद्रमर्यादामदीतेन वशीकृता॥ सिंधो बर्बरक
श्चास्य सिद्धराजस्ततो नवत्॥३१॥ अथैकदा जयसिंहदेवो। विजययात्रां कुर्वन् रेवतावलासन्नां॥ वामनस्थलीं प्रापतत्र॥ परस्त्र
राममाकार्य दंडमयाचत:॥ दंडाधिपेनोक्तं॥ रेवताचले ऽन्यस्थाने स्थापितोस्ति॥ ततो विप्रैर्लिंगाकारीयमिति निषिद्धोपि श्रीकर्णदेवगम
नेश्च त्वा रैवतं गत:॥ गजेंद्रपदकुंडे स्नात्वा श्रीनेमिं पूजयित्वा॥ धर्मशालायामुपविष्टप्रासादरम्यतामालोकयांचे॥ धन्यौ मातापितरौ त
स्य येनेदं कारितं अत्रावसरे परस्त्ररामउवाच॥ राजन् पृथिव्यां श्रीकर्णदेवमयणल्लदेव्यौ धन्ये॥ ययो: सूनुर्भवान्॥ श्रीकर्णविहारोयं ॥३॥
मत्पित्रा कारितो वर्षत्रयोद्धादितद्व्ययेन॥ एवं यदि श्रासादे श्चात दा प्रासाद:॥ अथ वाद्येच्छात दाद्रव्यं व्यवहारिगृहे स्थापितमस्ति।
तन्निशम्य प्रमुदितो राजा न कं मसज्जनेन कृतं। यदत्र कृतं नवति। तत्सर्वं कारयेत्यादिश्य। श्राद्ध ग्रामान्॥ देवपूजापदे दत्वा शत्रुंजयं ज
गाम॥ आरुह्य च युद्धे विप्रैर्निषिद्धो रात्रौ समारुरोह श्रीयुगादिदेवं पूजयित्वा। श्राद्धग्रामान्देवदाये दत्वा श्रीपत्तनं समाग
त॥ क्रमेण मालवकादि देशेषु। निजाज्ञापटहं दापयित्वा श्रीजयसिंहदेवो राज्यं पालयति स्म। सिद्धचक्रवर्त्तित्व बिरुदं जगत्स सिद्धं बभा
र॥ अथैकदा श्रीपत्तनपुरीयाभ्यासे। अष्टषष्टीतीर्थानि कुर्वंतौ। हिमाचलपर्वतिंगत:। तत्रोपरि ग्रहणार्थं नस्म निर्दिष्टो ऽवलनाथयो

गी तत्रोपविष्ट: पृष्टा योगिना कुतो व: समागम:॥ तैरुक्तं। श्रीपत्तननगरात्॥ तदवसरे योगिपार्श्वस्थाभ्यां सिद्धिबुद्धिभ्यां योगिच्छात्रिकाभ्यां
पृष्टं तत्र को राजा। ब्राह्मणैरुक्ते॥ श्री सिद्धचक्रवर्त्ति जयसिंहदेवो राजा॥ सिद्धचक्रवर्त्ति बिरुदश्रवणमात्रादेव रुष्टे सिद्धिबुद्धी। अ सहमाने
राज्ञ: परीक्षार्थं गगनाध्वना कदलीपत्रासनेसन्नायामायाते। राज्ञा सपरिकरेणाभ्युत्थाय। नमस्कृते। सौवर्णासनेउपवेशपृष्टे। कुत: के
नहेतुना भगवती स्मामद्य॥ ममानुग्रहो ऽकारि॥ योगिनीभ्यामूचे। राजन् सिद्धचक्रवर्त्ति। बिरुदं त्वयाकृतं। महदेतदत्र जगति। तद्विलो
कयितुं केनकलामंत्रतंत्रासनपवनधारणाणिमा महिमाद्यष्टमहासिद्धिप्रकर्षेण व्याप्यते ऽप्रतिहतप्रचारं॥ इति॥ परीक्षार्थं हिमवतो
ऽत्रागमनमावयोर्जातीहि॥ राजापि। निर्विषेणापि सर्पेण कर्त्तव्यं महती स्फुटा। विषं भवतु वामा वा स्फुटाटोपो भयंकर:॥ इति नीति
वित् कलाकौशलं शनै: शनैर्दर्शयिष्यते। भवतीभ्यां। परं संप्रति उत्तारके गम्यतां। स्वस्थीभूयतां चेति शीतलबहुमानवचोभिरानंद्य
प्रहिणोत् कस्मिंश्चिदावासे॥ राजा किमुत्तरमत्र देयं॥ एते योगिन्यौ विकटे॥ अत्र किमप्यतिशायिकलादिदर्शनं विना न छुट्यते। वि
रुदं च यातीति चिंतातुरो दिने दिने क्षीयते। षण्मासा। यत्र क्वचन विन्यासराजकार्यव्यग्रता दिना ऽतिवाहिता:॥ नगरे ऽनेके कलाविद: प
रंन स कोपि। योयोगिनी व्याघ्रीमुखेतिष्ठति। सर्व: कोपि सुखे सखा दुर्दिने न कोपि॥ यत:॥ सदपरिजनेन विलसति धीरो गहनानि तरति
भुजरेक:॥ विषमेकेन निपीतं त्रिभुवन जितामहसुरैरमृतं॥१॥ एकदा सांत्वसचिवेन दुर्बलकारणं पृष्ट:॥ श्रीजयसिंहदेव:॥ सिद्धिबुद्धि समा
गमादारभ्य सर्वं वृत्तांतमाह॥ मंत्रिन् किमत्रोत्तरं दातव्यं॥ एवं पत्तने। सर्वत्र वार्त्ता प्रसृता॥ यद्भूत राजा संकटे पपात। अत्र राज्ये सर्व: कोपि नि
कलो राजवर्ग:॥ अत्रावसरे हरिपाल। साकरिया कोगवाकस्थ:॥ पुत्रेण सज्जनेन पृष्ट:॥ तात महत्संकटं राज्ञ: कथं निर्मंडको भावी॥ उक्तं
हरिपालेन। एवंविधा: कुदेउका: कर्णदेववारके बहवो। पिमया निर्मंडिता:॥ परमधुना ऽस्माकं राजकुले कोपि न मानं दत्ते॥ राजापि। नटविट
वेश्याप्रिय:॥ विलोकयिष्यते तटस्थैरेव कौतुकमिस्येषा वार्त्ता। गृहं व्रजता। सांत्वमंत्रिणा श्रुता गवाक्षाध: समायातेन। निवेदितं राज्ञ: जनाते
॥ वारत्रयं पृथक् रक्षाकारितं:॥ धर्मध्यानांतरायो॥ राजसेवेति। विज्ञापितं। राज्ञो। राजापि। ज्ञातबहुमानादानादिवृत्तांतो। मंत्रिणमाका
रणार्थं प्रहितवान्। मंत्री सुखासनाधिरूढो गतो हरिपालगृहं॥ स बहुमानमाकारित:॥ वक्ति देवपूजावसरेस्मिन् सतं। साधर्मिकस्त्वमतिथी
नृतीबांधव एव॥ यत:॥ अतिथिश्चापवादी च। द्वावेतौ मम बांधवौ॥ अतिथि: स्वर्गसोपानमपवादि च पापहृत्॥१॥ इत्युक्त्वा देवपूजां कारि
तो भोजितश्च। सत्कृत्य सार्द्धं गतो राज्ञ: समीपे॥ साकरिहरिपाल:॥ राज्ञोक्तं॥ का का ऽद्य कल्ये सर्वावसरे नागम्यते॥ हरिपाल: प्राह। आर्त्ता
र्त्तनिराधर्मपरा नवंति। दृष्टा नारी पतिव्रतेतिन्यायाद्यकाकेतिकथयसि॥ अन्यदा नामापि न गृह्णासि॥ राजाप्यर्णदासेन। तथा कुरु
यथा नाममेनयाति। विज्ञप्तं हरिपालेन। देवदाप्यतामर्जुनवंशदासलो हच्छुरिकामुष्टि:॥ दापिता राज्ञा। दिनाष्टावधि: हरिपालेन। स्व

बृध्याशार्करीफलकंवंद्रहासलोहतुलंकृतं॥गजवद्व्याघ्राकाराः प्रकराः प्रतिकोशः स्वर्णरत्नमयः सांतसंत्रिणकारितः॥एवंप्रपंचेनशार्करामयी
।छुरिकांकृत्वा॥राज्ञेनिवेद्य।प्रज्ञातेसर्वराजस्यसमक्षमाकारितेयोगिन्यौ॥अथवादोयोगिनीभिः सह।नावीतिमिलितांसर्वेपिनागराः॥अत्रप्रस्ता
वे सांतहरिपालाभ्यां॥समीपस्थिताभ्यांविज्ञप्तं।हेसिद्धचक्रवर्त्तिन्।योगिन्योर्बकृतरःकालोगतः॥अद्यकाप्यपूर्वकलादर्शपतां।प्रतिकलाचविलो
क्यतां।अद्यकौतुकंमस्माकंपूर्यतामिति।विज्ञोराजा॥सोयोगिन्यौकथ्यतां।काकाकलाज्ञायते।नगवतीभ्यांकौगुरुः॥ताभ्यामुक्तं।अवलनाथएव
राज्ञाप्युक्तं।ममापि।सएव॥एवंवार्त्ताप्रस्तावे प्रतीहारः॥प्रणम्यदेवद्वारेकल्याणकटकाधीशप्रमाउिनृपमंत्रिणः।समायाताः संतीति।कोनियोगो
देवस्येति।आदराज्ञा।शीघ्रं।मत्राकारय।प्रतीहारप्रवेशे।राज्ञादत्तबहुमानाः प्रधानाः प्राहुः॥देवप्रमाउिनृपेण षोडशगजाः शादशरत्नादिभृतपेटाः
।अस्मदपिबहुवस्तु।प्राभृतीकृतानिसंति॥तानिदिनत्रयेणायास्यंति॥वयंदेवदर्शनोत्कंठिताः पूर्वमागताः॥एषाचचंद्रहासलोहमयीछु
रिकादेवयोग्या।वैरिक्षयकरी।प्रदिशेत्यनिधायपट्टकूलसन्नवेष्टनकमध्यान्निष्काश्यराज्ञः करेर्पिता॥कोशान्निष्काश्यविलोकिता।दर्शितास
ना।सांतहरिपालाभ्यांदर्शेकृत्वाविलोकितायोगिनीभ्यांदृष्टा॥राजाप्यनतःस्वचपति॥अहोकीदृग्लोहमयी।नक्वापिदृष्टैवंविधाछुरि
का॥अत्रांतरेसांतहरिपालाभ्यांप्रोक्तं।देवकंठेयंराजलीला।अलंछुरिकाविलोकनेन॥योगिनीभ्यांसदृक्षिप्रतामालापःदर्शयसातिशयं
कलाविशेषं।राजादेनगवत्योपरकलागारूढ।विषापहाराग्निस्तंभनवृद्धाआयुधस्तंभजलोपरिस्खलनादिकलासु।कांकलांदर्शयामि।मंत्रि
णोक्तं।देवअपराःकलाःसर्वदादृश्यंते।अद्यलोहनत्राणकौतुकंक्रियतां इत्युक्तेआनयतुमहल्लोहसंकलं॥मंत्री॥किमन्येनलोहेन॥इ
यंछुरिकैवनत्र्यस्तां॥लोकोहाहेतिकरोति।राज्ञायोगिन्योःपश्यंतोर्मक्षितंफलकं॥यावताभुष्टिरायाता।तावताधृतः।करेमंत्रिणा॥मुच्यतां॥इ
देव।दृष्टाकलाएतस्मारमयंती।क्षणंफलकंनक्षितं॥शेषंयोगिनीभ्यांदीयतां।विलोक्यते।एतयोःकला।राजाआह उच्छिष्टंमुष्टिकंकथंदी
यते॥मंत्री॥धातुषुलोहोतिर्नलगति॥राजातथापि॥वाशिलाप्रश्नात्प्रदेयं॥मंत्रीससहकृत्वःप्रकृत्यार्पयति॥योगिनीभ्यामुक्तं।हेराजन्नीदृ
शाशक्तियुक्तः॥त्वमेव।युक्तनममेवसिद्धचक्रवर्त्तिविरुदंनवतइति।वमतकृतेस्वस्थानंगतेयोगिन्यौ॥लोकोपिविस्मितः॥राज्ञोविरुदंसर्वत्रप्रसि
द्धिमगात्॥अथैकदासिद्धराजोवादशोरुद्रइति।विदितविरुदोदिग्विजयंकुर्वन्॥मालवदेशराजधानीधारांरश्वादशवर्षैर्जग्राह।प्रतोलिद्वयंस्फोटयि ॥४॥
त्वा।यशःपटहकुंजरेणलोहमर्गलामन्वभंजयत्।यशःपटहोगत्वाव्यंतरोऽभूत्।मालवेशो।नरवर्माजीवन्गृहीतः॥जयसिंहराज्ञःखड्गोवाद
शावर्षाणिनिश्चलाकारोऽस्थात्॥नरवर्मचर्मघटितमेवप्रसाकारंकारयामीतिप्रतिज्ञावशात्।वितस्तिमात्रंचर्मापिसत्कमुदतीतरत्॥अत्रां
तरेप्रधानैर्विज्ञप्तंराजन्राजाअवध्यएवेतिनीतिवचः॥तस्मान्मोक्तुमर्होऽयं॥ततोमुक्तःकाष्ठपंजरेक्षिप्तः॥नरवर्मचर्मन्निचर्मस्थं॥राज्ञानिजरू
पाणेप्रकारः कारितः॥तदनुनिखिलदेशासाधनादनंतधनंसंघटितं॥पत्तनसीमायांसमायातः॥तत्रसैन्यनिवेशः।सभायांवैदेसिकेननट्टेनभ

णितं॥अहोसिद्धनृपतेःसनामदनवर्मणइवमनोविस्मयजननीति॥राज्ञापृष्टः॥कोऽसौमदनवर्मनृपः॥नट्टःप्राह।देवपूर्वस्यांमहोबकं
नामपत्तनं।तत्रराजाश्रीमदनवर्मा।प्राज्ञस्त्यागीभोगीधर्मनयीच॥तस्यचराज्ञःपुरंसहस्रशोदृष्टमपिवर्णयितुंनशक्नोतिकोपि।यदिम
मवचोविश्वासोनस्यात्।तदाकोपिविदुरोमंत्रीप्रेष्यते।सचविलोक्य।राज्ञोविज्ञापयति।इतिश्रुत्वामंत्रिणंप्राहिणोत्।सहनट्टेन।षण्मासा
न्स्थित्वाविलोक्य।पश्चादायातेन।मंत्रिणाविज्ञप्तं॥श्रीसिद्धनृप।वयमितःप्रस्थितास्तत्रवसंतोत्सवेगीयंते॥वसंतांदोलकादिरागैर्गीतानि।
न्नमंतिदिव्यशृंगारानार्यः।मकरध्वजभ्रांतिकारिणो।विलसंतिलक्षशोयुवानः॥क्रियंतेप्रतिरथ्यं छंटनकानियक्षकर्दमैःप्रासादेषुसंगीत
कानि॥देवेदेवेमहाध्वजाः प्रतिगृहंसारा।भोजनव्यापाराः॥राज्ञःसत्रागारेतु।क्रूरावस्त्राचलानि।मुक्तलानि।नमुच्यंते।तदासघटोदस्ती॥
निमज्जति॥राज्ञीऽस्थचाराःपरितःपुरंभ्रमंतो।बीटकानि।ददतोलोकाय।कर्पूरचूर्णैःपूर्णस्निपर्वोत्सवः॥रात्रौविपणीन्।वणिजोनसंघट्टयं
ति॥उद्घाटान्विमुंचंति।प्रातरागत्योपविशंति॥एवंनीतिः॥व्यवसायीप्यन्वारमात्रेणैवलोकानां।तंविनापिप्रकारांतरैरपि।सिद्धार्थत्वात्
राजातुमयानदृष्टः॥इदंतुश्रुतं।नारीकुंजरःसभायांकदापिनोपविशति॥केवलं।हसितललितानि॥प्रत्यक्षइंद्रइवतनोति॥एवंमंत्रि
वचःश्रुत्वाऽमितसैन्यैर्महोबकंप्रतिप्रतस्थे।तदासन्नेकोशाष्टकप्रदेशे॥तस्थौ।क्षुभितोदेशः॥स्थानाच्चलितं।महोबकपत्तनं॥प्र
धानैर्मदनवर्मादिष्टोद्यानस्थः॥स्त्रीसहस्रसमावृतो।विज्ञप्तः॥स्वामिन्गौर्जरःसिद्धराजः।उपनगरमायातोस्ति।सकथंनिवर्त्तनी
यः॥मदनवर्मणास्मित्वाभणितं॥सिद्धराजःसोऽयंयोधारायांद्वादशवर्षाणिविग्रहायास्थात्॥कबाडीराजाचाम्यःसमवद्भिः॥यदिनोनुवंजियरुस्मि
तदायुद्धंकरिष्यामः॥अथार्थेनतृप्यसि।तदार्थंगृहाणेति।ततोयद्याचते।सवराकस्तदेयंभवद्भिःभवयंधनेदत्ते।तुष्टामः।सोपिजीवन्।चिरंचित्रा
र्थीकृतानि।कर्माणिकुर्वाणोऽस्ति।राज्ञोवचोलात्वामंत्रिणःस्थानमगुः॥तावता।सिद्धेशेन।कथापितं।दंडंदस्य।मंत्रीभिः।राजवाक्यं।हतमुखेनभाणि
तं॥यद्यर्थमीहसे।तदार्थलादि।यदिभूमिं।तर्हियुध्यामहेवयं॥मदनवर्मदेवादाज्ञापितं।नवदागमनं।तेनास्मत्प्रभुणोक्तं।कबाडीराजाऽर्थेन
तर्पणीयः॥ससिद्धराजानृत्तीलयाविस्मितः।षण्णवतिकोटीःकनकस्यायाचित्।दत्तास्ताः सद्यः।देशःसुखं।तस्थौ।प्रधानैर्भणितं।कथंनप्रति
गच्छसि॥सिद्धेसेनभाणितं॥मंत्रिपुरुषास्तंलीलानिधिंनवतप्रभुंदिदृक्षे।तेपिमदनवर्माणमभणन्॥अर्थेनतोषितःसिद्धराजाऽपरंन
गणति॥तंराजेंद्रंद्रष्टुमीहे।ततोमदनेनभणितं॥एतुसः॥ततःसैन्यंतथास्थंमुक्त्वा।मितसैन्यस्तत्रोद्यानेआयातः॥यत्रमहाप्राकारोस्थे।सोथे।मद
नवर्मास्ति।प्राकारावद्दि।योधिलक्षास्तिष्टंति।प्रतोलीयावदागत्यमध्येऽवीकथयत्।द्वास्थैःआगम्यतांजनत्वतुष्केणसहेति।राज्ञाज्ञापितं।आ
गतस्तथासिद्धराजः॥यावत्सनृपतिकांचनतोरणानि।सिद्धाराणिददर्शरजतमहारजतमयीर्वापीः॥नानादेशभाषावेषविदग्धा।निस्सीमसौ
भाग्यधारिणीःस्त्रीश्च।पणववेणुवीणामृदंगादिकलासक्तं।समग्रपरिजनं।श्रुत्वाचगीतानि।नंदनाधिकमुद्यानं।हंससारसादीन्खगान्।हेमा

मान्युपकरणानि। कदलीदलकोमलानि वसनानि। जनिताऽनंगरागानंगरागान्॥ उत्तुंगत्वक्ककरंटकाश्च॥ एवं भूरः भूरः प्रत्यपन्॥ अथ तः सा
क्षादिव मदनं। मधुरैवयसि वर्त्तमानं। मितरत्नमुक्ताफलाभरणं॥ सर्वांगलक्षणं कांचनप्रभं। मधुरस्वरं। तामरसाक्षं॥ उपचितगात्रं। मदनवर्माण
मपत्रपत्। मदनोप्यस्मै त्वा स्निग्धदृष्ट्या सनं दत्वा वनमनाणीत्॥ सिद्धेंद्र श्रुत्वा एवमस्माकं मध्ये नत्वमतिथिः संपन्नः॥ सिद्धनृपः प्राह। राजन्नावर्ज
नावर्जनावर्जनमिदं मिथ्या॥ यत्तु मंत्रिणा मध्ये कवाडी लुक्कं। तत्सत्यं। मदनो जगाद। राजन् केन विशेषेणैतत्। सिद्धेशः प्राह। तव मंत्रिभिः। कोऽपि
श्रायो मल्लिंदने॥ मदनोप्याह। देव कलिरयं स्वल्पमायुः॥ मिता राज्यलक्ष्मीः। तुच्छं बलं। तत्रापि पुण्यैः राज्यं लभ्यते॥ तदपि वेल्लभुज्यते॥ रूल्पते
विदेशीभू॥ कथं न कवाडिकत्वं। सत्यमेतदित्याह सिद्धेशः॥ धन्यस्त्वं। यस्येत्थं शर्मास्ति। त्वयि दृष्टे। सफलं जीवितमस्माकं। चिरं राज्यं भुंक्ष्व। इ
त्युक्त्वा तस्थौ। ततो मदनेनोत्थाय निजं देवतावसरकोशादि दर्शितं॥ प्रेमाधिक्यमन्योन्यं जातं॥ २२० पात्राणि स्वांगसेवकानि दत्तानि॥ ततः सिद्धेश
पत्तनं। मलेच्छकार २२० पात्रमध्याद् दृष्टं मार्गे मृतं। मार्द्दवात्॥ शेषं पत्तने प्रापत्। अतः श्रीकंककिरि॥ मदीव कपरा थीरा ज्जिताः मदनवर्मणः॥
कीर्त्तिः पणवतिदेव्याय स्तन्मान मिवाददे॥ १॥ यः कासारमुदारवारिजदरीलीलानिरस्तालिदं॥ साक्षात्सा वर्णचंद्रमंडलमिव श्रीपत्तनेऽ
धीकरत्॥ तस्यांतेव शिवा द्विका तिमनिली दैतस्य ता कांचनं। कीर्त्तिस्तंभमतिष्ठिपद्यद्वस्वं मूर्त्ततामाश्रितं॥ १॥ भुजौजसा पराजित्य दुर्द
बर्बरकं सुरं॥ प्रसिद्धचक्रवर्त्तीति नामान्यन्मान्यमानसे॥ २॥ सिंचन्वालवकुलानि छिदन् रोध्रानुपद्रवान्॥ आरामिक इवारामं स
पालयति भूतलं॥ ३॥ इतश्च तस्मिन्नवसरे पूर्वकोटिकगणे। वज्रशाखायां। चंद्रगच्छे श्रीदत्तसूरयो विहरंतो। वागडदेशस्य वटपद्रपु
रे प्रापुः॥ तत्र यशोभद्रनामा राजा नकोऽस्ति॥ प्रकृत्या सदयहृदयः॥ सूरयोपि श्रासुकं राजमंदिरासन्ने॥ क्वापुपाश्रये स्थिताः॥ ज्ञातस्
यगिमीय यशोभद्रराजाऽन्यदा वंदनायागतः॥ योग्योयमिति ज्ञात्वा सूरिभिरुक्तो। इदं मूलदेवकाप्यटिकलब्ध राज्यदपूर्णचंद्रस्वप्नद्वव
लनोमानुषीभव॥ यथा वज्राकरः पुण्यैरत्नेनेव वासुकृतार्जनं॥ कामदः कामघटवत् दुर्लभोऽनवीनृणां॥ १॥ यतः॥ धर्मोऽयं धनव
ल्लभेषु धनदः कामार्थिनां कामदः सौभाग्यार्थिषु तत्प्रदः॥ किमपरं पुत्रार्थिनां पुत्रदः। राज्यार्थिष्वपि राज्यदः किमथवा नानाविकल्पैर्नृणां
तत्किं यन्न करोति किं च कुरुते स्वर्गापवर्गावपि॥ १॥ धर्मस्य जननी जीवदया मान्या सुरैरपि तस्मात् देहिनां हिंसा न क्रियेत सुधीनरः॥ २॥ दानं ॥५॥
तपो देवपूजा शीलं सत्यमथो जपः॥ सर्वमप्यफलं तस्य यो हिंसां न परित्यजेत्॥ ४॥ कंटकेनापि संविद्धो देहो दूयेत निश्चितं॥ तत्कथं शस्त्रसंघाते
र्हन्यते हि परो जनः॥ ५॥ इति श्रुत्वा यशोभद्रनृपो॥ हे प्रभो सत्यमेतत्॥ परं जीवदयावृद्धीणां मततारंभिणो कृतः। तथापि॥ निरपराधत्रसजीव
वधो मया वर्ज्य इति। प्रतिज्ञा च॥ श्रीगुरुर्लब्ध्वा स्वस्थानं गतः॥ अन्यदा सन्नृपो वर्षाकाले विदितक्षेत्राणि विलोकितुं गतः॥ तत्र कर्मकर प्रज्वालि
ता मूलतृणादि पुंजे भुगर्भिणीं सर्पिणीं दग्धां दृष्ट्वा॥ पश्चात्तापपरीदग्धो॥ अदृढ रमो घरवासो परिहरणिज्जो विवेकवंताणं। बहुजीवविणासयरा

आरंभाजस्य कीरंति॥ १॥ इत्यादि। ततः श्रावकामात्यसहितः एकावली हारान् पिंडाणक स्थित श्रीदत्तगुरुपार्श्वे गतः॥ स्वपापमालोच्य द्वारेण श्रीवी
रस्येत संस्कारापयित्वा व्रती जातः॥ दीक्षादिन एव षड्विकृतित्यागं कृत्वा एकांतरोपवासकरणादि अभिग्रहं ललौ। कालेनाधीतसिद्धांतो गीतार्थः स
न् सूरिपदे स्थापितः श्रीगुरुभिः॥ बहुवर्षाणि पालितसंयमपर्यायः पांते त्रयोदशाकृपणोः स्वर्गतः॥ तत्पट्टे प्रद्युम्नसूरिः। तच्छिष्यः श्रीगुणसेनसू
रिः॥ तत्पट्टे श्रीदेवचंद्रसूरयः एकदा विहरंतो धंधूकपुरे प्रापुः॥ तत्र मोढवंशे चाचिक श्रेष्ठी पाहिनी नार्य्या। तयाऽन्यस्मिन् स्वप्ने चिंतामणिर्दृष्टः परं गुरुभ्यो
दत्तः॥ तदा तत्रागताः श्रीदेवचंद्रगुरवः पृष्टाः स्वप्नफलं॥ गुरुभिरुक्तं। पुत्रो भावी। तव चिंतामणितुल्यः॥ परं सत्सूरिराट्॥ जिनशासनोन्नविता। गु
रूणां रत्नदानात्। इति वचः श्रुत्वा मुदिता पाहिनी॥ तद्दिने गर्भे ब्रह्मार संवत् ११४५ कार्त्तिक पूर्णिमा रात्रिसमये पुत्रजन्म। तदा वागशरीरासी
चीत्। जिनापतत्त्ववित्॥ जिनवत् जिनधर्मस्य स्थापकः सूरिशेखरः॥ १॥ जन्मोत्सवपूर्वं चांगदेवेति नाम दत्तं। क्रमेण पंचवार्षिको मात्रा सह मो
ढवसहिकायां देववंदनायागतो बालचापल्यस्वभावेन देवनमस्करणार्थमागतश्रीदेवचंद्रगुरुनिषद्यायां निषण्णः॥ तथा दृष्ट्वा गुरुभिरुक्तं
पाहिनि। सुश्राविके स्मरसि स्वप्नविचारं पूर्वकथितं। संप्रति संवादफलं॥ बालकं मंगलक्षणानि विलोक्य मातुरग्रेऽकथि॥ यद्ययं क्षत्रियकु
ले तदा सार्वभौमो नरेंद्रः॥ यदि ब्राह्मण वणिग्कुले तदा महामात्यः॥ चेद्दीक्षां गृह्णाति॥ तदा युगप्रधान इव अस्मिन् युगे कृतयुगमवतारयतीति॥
सापि पाहिनी। गुरुवचो मृतोद्भासिता। सस्नुता गृहं गता॥ गुरवो पि शालायामागत्य श्रीसंघमाकार्य गताश्चाचिकश्रेष्ठिगृहे॥ चाचिके ग्रामां
तरंगते॥ पाहिन्या श्रीसंघो गृहागतः स्वागतकरणादिना तोषितः मार्गितश्चांगदेवः॥ हृष्टा पाहिनी दर्पाऽश्रुणि मुंचती स्वात्मनं गर्भ मन्यमाना
ऽपि चिंतातुराजाता॥ एकतः एतस्ता मिथ्यादृष्टिस्तादृशोपि ग्रामेनास्ति॥ एकतस्तु श्रीसंघो गृहागतः पुत्रं याचते। इति किं कर्त्तव्यं। मन्ये
ति। मूढचित्ता क्षणमभूत्। तदनु। कल्पद्रुमस्तस्य गृहेऽवतीर्णश्चिंतामणिस्तस्य करे लुलोठ॥ त्रैलोक्यलक्ष्मीरपितं वृणीते। गेहांग
णं यस्य पुनाति संघः॥ १॥ तथा॥ ऊर्वीगुर्वी तदनु जलदः सागरः कुंभजन्मा व्योमा द्योतौ रविहिमकरौ तौ च यस्यांघ्रिपीठे॥ सश्रीद
श्रीजिनपरिदृढः सोपि यस्य प्रणंता॥ स श्रीसंघस्त्रिभुवनगुरुः कस्य न स्यान्नमान्यः॥ २॥ इति प्रस्तुत्य सन्मतिर्माता श्रीसंघेन समं श्रीगु
रून् कल्पतरूनिव गृहागतान् ज्ञात्वाऽवसरज्ञा स्वजनानामनुमतिं लात्वा। निजं पुत्रं श्रीगुरुभ्यो ददौ॥ ततः श्रीगुरुभिः श्रीसंघस
मक्षं। हे वत्स॥ श्रीतीर्थंकर चक्रवर्त्ति गणधरैरासेवितां सुरासुरनरनिकरनायकमदनीयां मुक्तिकांतासंगमदूतीं दीक्षां त्वं लास्यसि
इति प्रोक्ते। स च कुमारः। प्राग्भववारित्रावरणीय कर्मक्षयोपशमेन संयमश्रवणमात्र संजात परमसंवेगः सहसा लेमिसुवाच॥ ततो मा
त्रा स्वजनैश्चानुमतं पुत्रं संयमानुरागपवित्रं॥ लात्वा॥ श्रीतीर्थयात्रां विधाय। कर्णावतीं जग्मुः श्रीगुरवः॥ तत्रोदयनमंत्रिगृहे। तत्सु
तैः समं बालधारकैः पाल्यमानः सकलसंघलोकमान्यः संयमपरिणामधन्यः वैनयिकादिगुणविज्ञो यावदास्ते। तावता ग्रामांतरादाग

तश्चाविगः पत्नी निवेदितश्रीगुरुसंयागमञ्चार्पणादिवृत्तांतः। ञ्चवदर्शनावधिसंत्येस्तसमस्तादारः। कर्णवित्सांगतः। तत्रवंदितागुरवः। श्रु
ताधर्मदेशना। सुतानुसारेणोपलक्ष्य। विचक्षणतया ऽन्नाणिश्रीगुरुभिः॥ कुलंपवित्रं। जननीकृतार्था। वसुंधरा भाग्यवती चतेन। अबा
ह्यमार्गेसुखसिंधुमग्नं॥ लीनंपरब्रह्मणियस्यचेतः॥१॥ कलंकंकुरुते कश्चित्कुलेति विमलेसुतः॥ धननाशकरः कश्चिद्व्यसनैः पुण्यना
शनैः॥२॥ पित्रोः संतापकः कोपियो वनेश्रेयसीमुखः॥ बाल्येपिम्रियते कोपिस्यात्कोपिविकलेंद्रियः॥३॥ सर्वांगिः सुंदरः किंतुज्ञानवान्
गुणनीरधिः॥ श्रीजिनेंद्रपथाध्वन्यः प्राप्यतेपुण्यतः सुतः॥४॥ इति श्रीगुरुमुखादाकर्ण्यसंजातप्रमोदः प्रसन्नचित्तश्चाविगस्तत्रश्रीगुरुपादार
विंदनमस्यायै। समायातेनोदयनमंत्रिणाधर्मबांधवधियानिजगृहे नीत्वा गुरुगौरवेण भोजयांचक्रे। तदनुचांगदेवं तदुत्संगेनिवेश्य। पंचां
गप्रसादपूर्वकं। डुकूलत्रयं द्रम्मलक्षत्रयंचोपनीय॥ मंत्रिकिक्रमावर्जितश्चाविगः॥ सानंदं मंत्रिणमवादित्। मंत्रिन् क्षत्रियस्यमूल्ये ऽष्टोत्त
राधिकः सहस्रः १०८० अश्वमूल्ये पंचाशदधिकानि॥ मत्तद्रशतानि १५० सामान्यस्यापिवणिजोनवनवति ९९ गजेंद्रा एतावतानवनवतिर्ल
क्षानवंतौ॥ त्वं तु लक्षत्रयमर्पयन्॥ स्खलन्नाप्यसे। यतोमत्सुतो ऽनर्घ्यस्त्वदीयाभक्तिस्त्वनर्घ्यतमा। तदस्यमूल्येभक्तिरस्तुनतु मेद्रव्येण
प्रयोजनमस्पर्शमेतन्ममशावनिर्माल्यमिवदत्तोमयापुत्रोभवता। मितिचाविगवचः श्रुत्वा प्रमुदितमनामंत्रीतंपरिरभ्य। साधुकृतमेतदितिवदन्।
पुनस्तंप्रत्युवाच। त्वयायंपुत्रोममार्पितः। परंयोगिमर्कटइवसर्वेषामपिजनानां नमस्कारं कुर्वन्केवलपरमानपात्रंभविता॥ श्रीगुरूणां तु स
मर्पितः श्रीगुरुपदं प्राप्य बालेंदुरिव महतां महनीयो भवतीति विचार्य तातयोचितं। ततः सत्यवद्विचार। एवप्रमाणमितिवदन्। सकलश्रीसं
घसमक्षं। रत्नकरंडमिवरक्षणीयं उदुंबरपुष्पमिवदुर्लभंपुत्रं। क्षमाश्रमणपूर्वकं। श्रीगुरूणां समर्पयामास। श्रीगुरुभिरन्याणि॥ धनधान्यस्य
दातारः संतिक्वचनकेचन। पुत्रभिक्षाप्रदः कोपिदुर्लभः पुण्यवान्भुमान्॥१॥ धनधान्यादिसंपत्तुलोकेसाराजसंततिः। तत्रापिपुत्ररत्नंतुत
त्सदानंमहत्तमं॥२॥ स्वर्गस्थाः पितरोवीक्ष्यदीक्षितंजिनदीक्षया॥ मोक्षाभिलाषिणंपुत्रंतत्राः स्युः स्वर्गिणिसदि॥३॥ मदाभारतेप्यभाणि॥
तावद्भ्रमंतिसंसारेपितरः पिंडकांक्षिणः॥ यावत्कुलेविशुद्धात्मायती पुत्रोनजायते॥४॥ इति श्रुत्वा॥ प्रमुदितेनचाविगेनोदयनमंत्रिणाच
प्रव्रज्यामहोत्सवः कारितः॥ सोमचंद्रमुनिर्नामदत्तं श्रीविक्रमात् ११४५ श्रीहेमसूरीणांजन्म ११५४ दीक्षाच॥ अथान्यदा नागपुरे धनदना ॥६॥
म्नः श्रेष्ठिनोगृहे। सत्यमालिकां यंगतस्तद्रुद्धेरष्टाभोजनं। स्वर्णराशिंचदृष्ट्वा प्रागं इदमाधुं प्राह॥ यथा॥ कस्मादस्यग्रहे ऽसमंजसमीदृशं। एकतः
स्वर्णराशिर्दृश्ये गवाक्षस्थेनश्रेष्ठिना। तच्छ्रुत्वा क्षुल्लक। मारूयांगारकराशौ। करोदापितास्तत्सर्वंस्वर्णंजातं। तत्प्रच्छादकः कश्चिन्नरः परं
ब्रह्मतेजोऽसदृशसुर्नष्टः॥ ततः संजातचमत्कारेणश्रेष्ठिना श्रीसंघेनच॥ हेमचंद्र इतिनामदापितं। ततः शनैः शनैः ज्ञानेन। तपसाविनयादिगुणैः। वयं
सावर्द्धमानः निजौदार्यगांभीर्य। धैर्यचैर्याधिका दिगुणगणेरावर्जितगुरुगच्छश्रीसंघलोकः कदाचित्॥ श्रीगुरुनाप्रच्छ्ययुगादौ॥ लोकोपका

राय॥ परब्रह्ममयपरमपुरुषप्रणीतमातृका ऽक्षरादज्ञालिपिविन्यासप्रकटनप्रवीणब्राह्म्यादिमूर्त्तिविलोकनाय॥ काश्मीरदेशं प्रतिप्र
स्थितः॥ श्रीहेमचंद्रः॥ ततः॥ कियंतमार्गं ऽतिक्रांतेसति। मिथ्यात्वतमः करालेस्मिन्कलिकाले ऽस्यश्रीजैनशासनप्रभावकस्य। महापु
रुषस्यवकपायसंकुलेपथिमात्रक्रमणप्रयासइतिसा। भगवती। स्वयंदिव्यरूपधारिणी। संमुखीना। समाजगामनिशीथे। अजिह्म
परब्रह्मवर्चसं। पद्मासनासीनं। मर्द्धनिमीलितलोचनं समाधियोगस्वाधीनस्वांतं। ध्यानाधिरूढं श्रीहेमचंद्रं दृष्ट्वा॥ जोवाच॥ रुद्धे
प्राणप्रचारे। वपुषिनियमिते। संवृते ऽक्षप्रपंचे। नेत्रस्पंदेनिरस्तेप्रलयमुपगतिसर्वसंकल्पजाले॥ भिन्नेमोहांधकारेप्रसरतिमहसि
क्वापिविश्वप्रदीपे॥ धन्योध्यानावलंबीकलयतिपरमानंदसिंधौप्रवेशं॥१॥ संकल्पमात्रादपिसिद्धकार्याकांक्षंतितेनैवतथापिकिंचि
त्॥ इच्छाविनाशेनयदस्तिसौख्यं। तदेवजानंतिगुरुप्रसादात्॥२॥ तथाप्ययंपरमपुरुषः॥ सकलपुरुषार्थः॥ प्रणेता ऽस्मिन्निरतिश
येकाले श्रीशासनस्यप्रभावकोभावीतिकृत्वाकतिपयविद्यामंत्रान्॥ श्रीविद्याप्रवादसंवादसुंदरान्साम्नायान्प्रदायप्रमुदिता
भगवती॥ भारतीकृतस्तुतिस्तिरो ऽभूत्॥ पुनः पश्चादागतएकदाश्रीगुरुनापृच्छ्यान्यगच्छीयदेवेंद्रसूरिमलयगिरिभ्यांसह कला
पकौशलाद्यर्थं। गौडदेशं प्रतिप्रस्थितः। खिल्लूरग्रामेच॥ त्रयोजनागतास्तत्रग्लानोमुनिर्वैयावृत्त्यादिनाप्रतिचरितः॥ श्रीरैवतक ती
र्थदेवनमस्करणकृतार्त्ति। र्यावद्ग्रामाध्यक्षश्राद्धेभ्यः सुखासनं। तद्वाहकांश्चप्रगुणीकृत्यरात्रौसुप्ताः स्तावत्स्वप्नेप्रबुद्धाः स्वंरैवत
केपश्यंति॥ शासनदेवताप्रत्यक्षीभूय॥ कृतगुणस्तुतिर्नग्यवतांभवतामत्रस्थितानां। सर्वंभावितिगौडदेशगमनंनिषिद्धं। महौषधीर
नेकान्मंत्रान्नामप्रभावाद्याख्यानपूर्वकमाख्यायस्वस्थानंजगाम। एकदाश्रीगुरुभिः सुमुहूर्त्ते। दीपोत्सवचतुर्दशीरात्रौ श्रीसिद्धच
क्रमंत्रः साम्नायः समुपदिष्टः। सचपद्मिनीस्त्रीकृतोत्तरसाधकत्वेनसाध्यते॥ ततः सिद्ध्यति। याचितंवरंदत्ते। नाऽन्यथा। ततोऽन्यदाकु
मारग्रामेधौतांशोपणार्थंविस्तारितांशाटिकांपरिमलाकर्षितभ्रमरकुलसंकुलामालोक्यपृष्टोरजकस्तैः कस्याइयंशाटिकेति। सोऽवग्ग्रामाध्यक्षस्य
स्त्रा इयं। ततोगतास्तस्मिन्ग्रामे। ग्रामाध्यक्षप्रदत्तोपाश्रयेस्थिताः। सच प्रत्यहं समायाति। धर्मदेशनां। श्रृणोति। तेषां ज्ञानक्रियावैराग्यप्रमत्तत्वादि
गुणान्दृष्ट्वा। तथाविधभव्यत्वपरिपाकात्। गुणानुरागरंजितस्वांतः॥ प्रमुदितः प्राह। यूयमनिच्छपरमेश्वराः किमपिकार्यमच्छाध्यं। मनादिशं
तु वतस्तैतं स्वातनिवेदितंगुणानुरागगंभीरवेदितंज्ञात्वा प्राहुः॥ अस्माकं श्रीसिद्धचक्रमंत्रः साधयितुमिष्टोऽस्ति सचपद्मिनीस्त्रीकृतोत्तरसाधक
त्वेनसिध्यति। नान्यथा तेन। तवयापद्मिनीस्त्रीवर्त्ततेतां लात्वात्वंकृष्णचतुर्दशीरात्रौरैवतकाचले। समागच्छ। मुत्तरसाधकत्वं कुरु। विकार
दर्शनेशिरश्छेदस्त्वयैवविधेयः॥ इत्याकर्ण्यग्रामाध्यक्षोविस्मयस्मेरमनामनाग्विमर्षचिंतयांचकार॥ एतेताम्रदर्षयः। समतृणमणिलोष्टकां
चनाः परब्रह्मसमाधिसाधकाः॥ तदेतेषामिदं कार्यं वर्यं समर्यादमनस्त्वियाचेद्भवति। तदातथास्तु किंबहुविचारेणेति। विचिंत्यैकस्मिन्दिनेतेः स

पंसर्ल्पीकः सुतरां निनीकः श्रीरैवताचलमौलिमलंचकार॥ तेच त्रयः कृतसर्वकृत्याः श्रीअंबिकाकृतमान्निध्याः स्वत्रध्यानधीरधियः श्री
रैवतदैवतदृष्टौ त्रियामिस्मामाकृता नाच गुंजन मुंप्राकरणमंत्रं। न्यासविसर्जनादिनिरुपचारैर्गुरूक्तविधिना समीपस्थपद्मिनी स्त्रीकृतो नरसा
धककियाः श्रीसिद्धचक्रसमाधयन्। ततइंद्रसामानिकदेवोस्याधिष्ठाता श्रीविमलेश्वरनामा। प्रत्यक्षीभूय पुष्पवृष्टिं विधाय स्वेप्सितवरं
वृणुतेत्युवाच॥ ततः श्रीहेमसूरिणा राजप्रतिबोधः। देवेंद्रसूरिणा निजावदातवरणा निजावदातकरणाय कांतीनगर्याः प्रासादएककरा
त्रौध्यानबलेन। सेरीसकग्रामे समानीतः इतिजनप्रसिद्धिः। मलयगिरिसूरिणा सिद्धांतवृत्तिकरणवरः इतित्रयाणां वरं दत्वा देवः स्वस्थानमगा
त॥ प्रमुदितो ग्रामेशाः प्रत्येकं बहुवित्तव्ययेन प्रभावनां विधाय त्रयाणां ध्यानस्थैर्यं ब्रह्मचर्यं देवकृत प्रशंसा वरप्रदानं च जनेषु प्रकटीकृत्य
निजजायां गृहीत्वा स्वग्रामं जगाम॥ अथ हेमचंद्रमुनेस्तत्तद्देवतावरप्रदानविद्वत्तादिगुणसंपदा रंजितश्रीगुरुसंघसांमत्येन॥ नागपुरी
यधनदारिणा धनदाख्येन सं० ११६६ वर्षे महामहेन आचार्यपदं कारितं॥ हेमवत्कांतिमत्वाच्चंद्रवदाह्लादकत्वाच्च हेमचंद्राचार्याः सर्वत्र प्रसिद्धा
॥ अन्येद्युः श्रीसिद्धराजो राजपथे व्रजन् श्रीहेमाचार्यं ददर्श। चिंतितवान्। धर्मः किं मूर्त्तिमानेष किं मुसाम्यश्चांबुधिः। मुनीशो नयनानंदी दृश्योयं
पापतापहृत्॥१॥ इत्थं निरुध्य यावत्किमपि ब्रूते राजा। तावत्सूरयः प्रोचुः॥ सिद्धराजगजराज मुच्चकैः। कारय प्रसरमेतमग्रतः॥ संत्रसंतु द
रितां मतंगजास्ते किमत्र भवतैव भूर्धृता॥२॥ अनयोक्त्या चमत्कृतो मत्वा श्वः समागम्यं॥ श्रीमद्भिः सदेत्युक्त्वा जगाम स्वधाम राजा। महीना
थमहातीर्थे। महोपध्यो मुनीश्वराः॥ अल्पभाग्यवतां प्रायो दुर्लभदर्शनाः॥ इति चिंतितसूरयोपि यथावसरं राजसंसदि गत्वा राजानं रंज
यामासुः॥ अथान्यदा संसारसागरं तितीर्षुः॥ सिद्धराजः सर्वदर्शनेषु स्वस्तुतिपरनिंदापरेषु श्रद्धधर्मादि जितासयाः श्रीहेमसूरिं नृपप्र
च्छ॥ को धर्मः संसारपारद इति॥ सूरयोपि सर्वदर्शनाविसंवादेन पुराणोक्तं। शंखवाख्यानं वदंति स्म॥ यथा॥ शंखपुरे शंखश्रेष्ठी यशो
मती भार्या कालेन त्यां निःस्नेहीऽपरां स्त्रीमूढवान्। नवीनपत्नीवशीकृतो यशोमत्याः संमुखमपि न विलोकयति स्म। यशोमती
चिंतयति। वरं रंक कलत्रत्वं। वरं रंककलत्रत्वं। वरं वैधव्यवेदना। वरं नरकवासो वा मा सपत्नीपराभवः॥१॥ एकदा किंचित् गौडदे
शागतं॥ कलावंतं बहुभक्त्यावर्ज्य तत्पार्श्वे पुरुषपशुकरणक्षमं। किंचिदौषधं गृहीत्वा मंत्रेनीजनां तर्दत्तवती॥ तेनौषधेन तुक्त्या ॥१॥
त्रेण शंखो वृषभोऽजनि। तद्वृत्तांतश्रवणे लोकैर्निंद्यमाना। तत्प्रतीकारमजानाना। स्वं स्वं दुश्चरितं शोचयंती। कदाचिन्मध्यं दिनेदिने
श्वरखरतरकरप्रसरतापमाना पिशाद्वलभूमिषु तं पतिवृषं॥ चारयंती कस्यापि तरोस्तले विश्रांता निरंतरं विललाप। दैवात्तदा विमानाधि
रूढां गौर्यान्वितः शिवो नभसा गच्छन्। तद्विलापान् शुश्राव। गौर्यापि संजातकृपया पृष्टस्तद्दुःखकारणं प्राह शिवः॥ नवतत्त्वगातेर्विलसित
मेतत्॥ यन्मर्त्योपि जातोऽनड्वान्। ततः स्वरूपं सर्वं कथितं। गौर्याप्रोक्तं। तदौषधं किमप्यस्ति। येनायं पुनः पुरुषो भवेत्॥ अतिनिर्बंधे

एतस्यैव तरोश्छायायां पुंस्त्वनिबंधनमौषधं निवेद्य जगामायतो महेशः॥ ततश्च तदीश्वरवचनं श्रुत्वा यशोमत्यपि। तदीयां छायां रेखांकितां
कृत्वा तन्मध्यवर्त्तिनश्चौषधांकुरान् छेद्य वृषभवदने। सर्वविच्छित्तृणादि सहितान् क्षिप्तवती। एवमज्ञाततत्स्वरूपेणापि। तेनौषधांकुरेण
पशुपुनो मनुष्यतां प्राप॥ हृष्टा च यशोमती॥ लोकैः पूज्यमाना सुखभागजायत॥ तिरोहितत्तदर्शदैर्ययादिवत्तदौषधं॥ तथा मु॥ —युगेस
तोधर्मो धर्मांतिरेनृप॥१॥ परं समग्रधर्माणां सेवनात्कस्यचित्क्वचित्॥ जायते धर्मप्रिर्दर्नछिन्नोपधामिवत्॥२॥ तत्राजन् जीवदयासत्य
वचनाद्यविसंवादेन सर्वधर्माराधनं क्रियते॥ इति श्रीहेमाचार्योपदेशेन सनासदः श्रीसिद्धनृपोपि हृष्टाः॥ अन्यदा राज्ञा पुनः पृष्टाः श्रीहेम
सूरयः प्राहुः॥ पात्रे दानं गुरुषु विनयः सर्वसत्वानुकंपा न्याय्यावृत्तिः परहितविधावादरः सर्वकालं। कार्यो नित्यं मदपरिचयः संगतिः स
त्सु सम्यक्। राजन् संक्षोविशादमतिना सैष सामान्यधर्मः॥१॥ पुनः पात्रपरिज्ञायां नीमः॥ मूर्खस्तपस्वी राजेंद्र विप्रश्च दुष्प्रतिपतिः॥ उ
भौतौ तिष्ठतो द्वारे कस्य दानं प्रदीयते॥१॥ युधि० सुखवासेव्यंतपोनीमविद्याकष्टश्च रासदा॥ विप्रं संत्यजधिष्णामितपोनिः किं प्रयोजनं॥२॥
अर्जुनः॥ स्वानवर्मगतागंगाक्षीरं मद्यघटस्थितं॥ अपात्रेपतिता विद्या किं करोति युधिष्ठिर॥३॥ द्वैपा० न विद्यया केवलया तपसा वापि
पात्रता॥ यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्षते॥४॥ इतिमहाभारतोक्तसंवादेन प्राहुः॥ अन्यदा सिद्धपुरे रुद्रमहालयप्रासादे। निष्पद्यमाने। अ
भूमंत्रिणा च। चतुर्मुखश्रीराजविहाराख्य। श्रीमहावीरप्रासादे। कार्यमाणे विश्वजनप्रवेशे। राजा स्वयमवलोकनार्थमायातः॥ पप्रच्छ कोऽत्र
विशेषः॥ श्रीहेमसूरिभिः प्रोचे। राजन् महेश्वरस्य नालेचंद्रः॥ श्रीजिनेंद्रस्य पादांते। न चापि प्रदा। मूर्त्तिमंतो भवंतीति विशेषः॥ श्रीसिद्धराजो न
मन्यते॥ ततो वास्तुविद्याविदः पृष्टाः॥ तत्र सामान्यलोकानां गृहद्वारं पंचहस्तं॥ राज्ञां गृहद्वारं सप्तहस्तं। रुद्रादिदेवानां नवहस्तं॥ श्रीजिनस्यैकविं
शतिहस्तं द्वारं॥ अन्यदेवप्रासादे एक एव मंडपः॥ अष्टोत्तरशतमंडपा जिनप्रासादे। चतुर्द्वारेषु प्रत्येकं। सप्तविंशतिः २७ सद्भावात्॥ जिनस्य छत्रत्र
यं सिंहासनं॥ पदाधीनवग्रहाः॥ यदुक्तं॥ प्राकारमंडपछत्रपर्यंकासनपद्महैः॥ निर्दोषदृष्ट्यामूर्त्याचि देवो नेदजिनात्परः॥१॥ आदिशक्तिर्जिनें
द्राणामासने गर्भसंस्थिता॥ सहजा कुलजा ध्यानेपद्महस्ता वरप्रदा॥२॥ अन्यदेवानां चेत्कश्चित्कारयति स तु अधश्च करोति। तदा द्वयोर्विघ्नमु
त्पद्यते॥ नान्यथा॥ वास्तुविद्यासर्वत्रनापितत्वा। एतदाकर्ण्य प्रमुदितः श्रीजयसिंहदेवः स्वयं श्रीराजविहारे सौवर्णकलशारोपणादिकमका
रयत्॥ महाजयो महायात्रामहास्थानं महासरः॥ यत्कृतं सिद्धराजेन क्रियते तन्न केनचित्॥१॥ अथैकदा श्रीहेमसूरयः॥ श्रीसिद्धनृपोपरोधेन
पत्तने चतुर्मासीं स्थिताः॥ श्रीचतुर्मुखराजजिनालये॥ श्रीनेमिचरित्रव्याख्याने। जायमाने। सुधोपमवचस्तोमाकृष्टमानससदाः॥ शुश्रूषवः
समायांति तत्र दर्शनिनोऽखिलाः॥१॥ तत्र च पांडवानां प्रव्रज्या श्रीशत्रुंजयमुक्तिगमनादि। श्रीप्रभुव्याख्याते श्रुत्वा॥ विप्रामत्सरध्माताः॥ श्रीजय
सिंहनृपाग्रे इदं प्रोचुः॥ हे राजन् एते। श्वेतांबराः शूद्रा। यत्तन्मुख्यपापिणो। व्याख्यापर्षदि। समग्रदर्शनसमक्षं पांडवानां श्रीभारते। श्रीकेदारगमनश्री

नृपायनादिप्रोक्तमुत्थापयंति॥ एवं वादिनो विप्रा वारत्रूपणेन। धर्मदेषिणो राज्ञानुवारिणीया॥ एवेति विप्रोक्तं श्रुत्वा राज्ञोक्तं भो विप्रा नहि नृपाः स
दसाः विमृश्य विधायिनः। हेमसूरयोपि मुनीश्वराः। सर्वसंगत्यागिनो नहि प्राणांतेपि मृषा वदंति। परं प्रातरा कार्यं ज्ञायते॥ एवं न वक्तिति श्रोतुः
प्रवीण ब्राह्मणा अपि आजुहाव ततो राजा हेमचंद्रमुनीश्वरं॥१॥ राज्ञा समस्त सामंत राजगुरु प्रोहितादि प्रत्यक्षं। पांडवानां मुक्तिगमनादिस्वरू
पं पृष्टं॥ सूरिरप्याह॥ हे राजन्॥ श्रूयतां पूर्वसूरिभिः॥ हेमादिगमनं तेषां महाभारतमध्यतः॥१॥ परमेतन्न जानीमो जैनशास्त्रे प्रवर्णिताः॥ तएव व्या
सशास्त्रेपि संकीर्त्तिता अथवापरे॥२॥ राजाह तेपि बहवः पूर्वं जाताः कथं मुने॥ अथा वोच गुरुस्तत्र श्रूयतामुत्तरं नृप॥२॥ भारते युद्ध कुर्वता
गांगेयेन स्वपरिछदाग्रे। एवमुक्तं॥ प्राणमुक्तौ मम तु संस्कारस्तत्र कार्यो यत्र कोपि प्राग्दग्धो न स्यात्॥ ततः॥ विधाय स्नाय संग्रामं मुक्त प्राणेपि
तामहे। विमृश्य तत्व सेंगमुत्पाद्य प्रययुर्गिरौ॥३॥ यावता तत्र शृंगे देहसंस्कारं कुर्वंति। तावत्। तत्र दिव्यवाणी प्रादुरभूदेवं॥ तथाहि॥
अत्र भीष्मशतं दग्धं पांडवानां शतत्रयं॥ द्रोणाचार्य सहस्रं तु कर्णसंख्या न विद्यते॥१॥ श्रीराजन्नेतद्भारतवाक्यं ज्ञात्वाऽस्माभिः पांडवानां मु
क्तिर्व्याख्याता॥१॥ शत्रुंजये नाम्ना कपर्दे चंद्रप्रभप्रासादे चैतेषां। मूर्त्तयश्च संप्रतिसंति॥ श्वयति केपि जनाः पांडवा बभूवुः॥ एतत् हेमसूरिव
चः श्रुत्वा राज्ञा प्रोक्तं॥ भो विप्रा वदतावीत्तरं॥ अयं च जैनर्षिः सत्यवादी विचक्षणः॥ भवंतस्तु मिथ्याभिमानायत्तत् प्रलापिन एव॥ ततो राज्ञा
श्रीसूरयः पूजिताः स्वस्थानमलमकार्षुः। लोके महती प्रभावनाभूत्॥ इत्थं स्वर्गो निर्जयसिंहदेव॥ संदेहसंदोहतमांस्यपास्य न॥ उच्चैर्नय
न जैनमतांबुजन्मा श्रीहेमसूरिः स्मृश्रु नेसमास्वान्॥२॥ एकदा कर्णमेरुप्रासादाद्बलमानेन राज्ञा कस्यापि धनिनो गृहे बहून् प्रदीपान् दृष्ट्वा
तद्वृत्तं जिज्ञासुना। प्रातरा कार्य पृष्टः श्रेष्ठी॥ स्वगृहे केन हेतुना। बहवो दीपाः॥ तेनोक्तं। देव मम गृहे स्व उरशीतिर्लक्षाः स्वर्णस्य संति॥ एकैक
लक्षस्यैकैको दीपो दीप्यते॥ एतदाकर्ण्य राजा प्रजावत्सलतया॥ अनेन विश्वासः इति प्रोक्त षोडशलक्षान् स्वकोशाद्दापयित्वास
धनी कोटीध्वजः कृतः॥ श्रीसिद्धराजस्य उ विणस्य काकोटिः प्रतिवर्षं उत्पन्नयोग्येन राज्ञा स्वमातुः॥ श्रीमयणल्लदेव्या॥ उपलक्षे बाहलोडग्रा
मेयात्रिकली कानां करो ७२ लक्षप्रमितो मुक्तः॥ यतः॥ अकरेकरकर्त्ता वृगोसहस्रवधः कृतः॥ प्रवृत्तकरविछेदे गवां कोटिफलं लभेत्॥
३॥ एकदा श्रीसिद्धराजो। मालवकं विजित्य पत्तनमायातः॥ अनेकैः कविभिरनेकधास्तूयमानः॥ श्रीप्रभुभिरपि। धर्मप्रभावकत्वा। देवमुप
श्लोकितः॥ भूमिं कामगविस्वगोमयरसैरासिंच रत्नाकरा॥ मुक्तास्वस्तिमकातनुध्वमुडुपत्वं पूर्णकुंभीनव॥ धृत्वा कल्पतरोर्दलानि सरलै ॥८॥
र्दिग्वारणास्तोरणं स्याधत्तस्वकरैर्विजित्य जगतीं नन्वेति सिद्धाधिपः॥१॥ अस्मिन्काव्ये नि:प्रपंचप्रपंच्यमानं ऽस्मद्भुतार्थ चातुरी चमत्कृतो नृ
पतिः॥ सूरिं प्रशंसन्॥ कैश्चिदसहिष्णुभिः सख्याख्यातया सम्यनवला। देतेषां॥ विद्वते स्वनिश्चितेराजाह। किमिदं। श्रीहेमसूरिः प्राह। पुराश्री
वीरजिनेंद्रस्य पुरः। शैशवे। पत्यारब्धं। तज्जैनेंद्रं व्याकरणं। वयमधीयामहे॥ नृपतिरूचाव॥ पुरातनं मुक्त्वा। कमप्यासन्नं कर्त्तारं ब्रूत। गुरु॥

राजन्काश्मीरदेशे॥ प्रवरारव्य पुरे॥ श्रीभारती कोशे॥ अष्ट व्याकरणीष्टक प्रतयः संति। ताश्च भारती। प्रसाद्यात्मनाप्य वसमर्प्पय। येन व्याक
रणं निष्पद्यते। तदनुराज्ञा प्राधाना स्तत्र प्रहिताः। तैराराधिता भारती॥ सामादिष्टा तत्र तस्थानिजाधिष्टायकान् गिरा॥ मम प्रसादवित्त श्री हे
मचंद्रः सितांबरः॥१॥ पुरुषाद्वितीयामन्मूर्त्तिरयं गुरुरतः प्रतयः समर्प्यंतां। ततः कोशाधिकारिभिरर्पिताः प्रतीर्गृहीत्वा प्रधानाः पत्तनं
प्राप्ताः। सर्वं शारदीकं राज्ञे। विज्ञपयामासुः। तदाकर्ण्य चमत्कारं धारयन् वसुधाधिपः॥ उवाच धन्यो मद्देशो दंचयत्रेदृशः कृती॥१॥
व्याकरणप्रतयश्च श्रीसूरिभ्यः समर्पिताः। सूरिभिरपि सर्वव्याकरणान्यवगाह्य। सारं समादाय। द्वात्रिंशत्पादोणाद्यादि परिपूर्णं। वर्षे
णपंचांगं। नवीनं सपादलक्षमितं। श्रीहेमचंद्राभिधानं व्याकरणं। निर्माय। श्रीराजवरस्कुंभिकुंभे। पुस्तकमधिरोप्य। सितातप
वारणे ध्रियमाणे। चामरैर्वीज्यमानं। नृपसभामानीय॥ समग्रविद्वत्समक्षं वाचयित्वा राज्ञा कृत। पूजोपचारं सरस्वती कोशे स्था
पितं॥ अत्रांतरे श्रीहेमसूरेर्महिमानमसहिष्णुभि। ब्राह्मणैर्नृपो विज्ञप्तः॥ हे सिद्धराज। व्याकरणमिदं श्रुत्वाऽश्रद्धत्वपरीक्षां विना
कृतां न राज्ञः॥ सरस्वती कोशे। स्थापयितुं युक्तं। अश्वादिपरीक्षा। तदास्या यदा काश्मीरदेशे चंद्रकांतश्रीब्राह्मीमूर्त्तेः पुरः स्थित जल
कुंडे क्षिप्यते। कुंडाच्च॥ यद्यक्लिन्नो निर्गच्छति पुस्तकः॥ तदा ज्ञायते शुद्धोयमिति विप्रैर्विज्ञप्तो राजा इतः संशयाकुलः प्रधानान् विशुद्ध
व्याकरण पुस्तकं दत्वा॥ काश्मीरदेशे॥ प्रहितवान्॥ तैश्च तत्र गत्वा। तत्रत्य नरविद्वत्समक्षं। सरस्वती कुंडमध्ये। मुक्तः घटिकाद्वयं श्री
शारदानुभावात्॥ कलिकाल सर्वज्ञ हेमसूरिप्रणीतत्वेन च॥ परमशुद्धिमत्वात्। यथा स्थितः। अक्लिन्न एव निर्गतः॥ लोके महाविस्मयश्च॥
ततस्तत्रत्य नृपसत्कृताः प्रधानाः पश्चादायजुः॥ राज्ञोग्रे जलमध्य पुस्तकप्रक्षेपादिवृत्तांतः सर्वोप्यकथि। ततो राज्ञा विस्मित हृष्टहृदयेन
॥ लेखकशतत्रयं मेलयित्वा॥ वर्षत्रयं यावत्। श्रीसिद्धहेमचंद्रव्याकरणप्रतयो लेखिताः॥ अष्टादशदेशेषु प्रवसर्वधीते गूणं न गणनं ना
णनाय प्रहिताश्च। ततो राजाज्ञया सर्वः कोपि पठति पठंतिच॥ अतः पाणिनिसंकृपुप्रजल्पितं॥ कातंत्रकंथा कथां॥ माकार्षीः कटु शाकटाय
नवचः क्षुद्रेण चांद्रेण किं॥ कः कंठाभरणादिभिर्बठरयत्यात्मानमन्यैरपि॥ श्रूयंते यदि तावदर्थमधुरा श्रीसिद्धहेमोक्तयः॥१॥ एवं सिद्धराजं।
धर्माभिमुखं कृत्वा सर्वत्र विहारार्थिनो देवता देशावशेन। श्री हेमाचार्याः पत्तन एव प्रायस्तस्थुः॥ यदुक्तं॥ निश्चं सदा वचश्रिया समयलो
उवयारकयविस्रो॥ सो देवयाइ वुत्तो॥ विहरंतो विविहदेसे सु॥१॥ इत्यादि॥ अथ दधिस्थली पुर्याः श्रीभीमदेवसुत क्षेमराजसुतो। दे
वप्रसादस्तत्सुतः श्रीत्रिभुवनपालः॥ भार्या कस्मीरदेवी। तस्यांगर्भे सिसुत्सन्ने। एवं दोहदः आमुद्रक्षितेस्त्राणं प्राणिनामभयार्प्पणं। व्यसना
नां निषेधं च। सा कांक्षत्सु नगर्भतः॥१॥ क्रमेण पूर्णे दोहदे सुतो जातः॥ कुमार इव तेजस्वी क्षितिं पालयिष्यतीति पितृभ्यां कुमारपाल
इति नाम कृतं॥ क्रमेण शास्त्रशास्त्रकला पारीणः॥ क्रमेण च महीपाल कीर्त्तिकपालौ सुतावपरौ जातौ॥ सुता प्रेमलदेवी श्रीजयसिंह

देवतुरंगमाध्यक्षेण कृष्णदेवेन परिणीता॥ द्वितीया॥ देवलदेवी॥ नागकंन्नरी वरीसा॥ ऽर्णोराजेन परिणीता॥ श्रीकुमारपालो॥ पितृस्थानी भो
पलदेवी॥ राजकन्यां विवाहित:॥ एवं कुमारपालादि चैत्र्लाजिद्युवैनव:॥ त्रिभिस्त्रिभुवनपालनृपते ऽत्नवत॥१२॥ एकदा श्रीजयसिंह
नृपसेवायै॥ श्रीकुमारपाल: पत्तनेगत:॥ तत्रनृपसदसिमिंहासनोपविष्टा राज्ञोये श्रीहेमाचार्य दृष्टा:॥ एतेकलाब्धयो राज्ञोमान्या जैना॥
मुनीश्वरा:॥ एषां दर्शनतोन्हृत्तं॥ ब्रएपरात्रि: समुद्रसेत॥१॥ चेतसीति विचिंत्यागात्सोपथागारमेकदा॥ गुणगोष्ट्यां प्रवृत्ताया तत्राभ्या
र्यमिष्टष्टवान्॥२॥ गुणेषु कोगुण: श्रेष्ठ सामयुणी: सकलेष्विह॥ वावंवाम्वं यमाथीशास्तत एवं तनृविवान्॥३॥ सत्वमेकमहं मन्ये गुणेषु
निखिलेष्वपि॥ परदारसदोदर्या वर्जितं सार्वभौमनि॥४॥ यत:॥ सत्वं सर्वगुणौघमस्तकमणि: सत्वं जयश्रीप्रदे॥ सत्वं सर्वपदार्थसिद्धि
विधये लोकोत्तराकामधुक॥ द्वात्रिंशद्दरलक्षणाधिकमिदं रव्यातं च सत्लक्षणं॥ सत्वं सत्ववति प्रतिष्ठित तमासर्वाभिमर्थस्थिति:॥
॥ यद्वा॥ अपातुलक्ष्मीश्चपलस्वभावा गुणाविवेकप्रमुखा: प्रयांतु॥ प्राणाश्च गछंतु कृतप्रयाणा॥ मायातु सत्वं तु नृणां कदाचित॥२॥
एकोपिय: सकलकार्यविधौ समर्थ: सत्वाधिको भवतु किं बहुभि: प्रसूतै:॥ चंद्र: प्रकाशयति दिग्मुखमंडलानि॥ तारागण: समुदितो
पसमर्थ एव॥३॥ विजेतव्यालंकाचरणतरणीयो जलनिधिर्विपक्ष: पौलस्त्यो रणभुवि सहायाश्च कपय:॥ तथाप्याजौ राम: सकलमव
धीद्राक्षसकुलं क्रियासिद्धि: सत्वे वसति महतां नोपकरणे॥५॥ रथस्यैकं चक्रं भुजगयमिता: सप्ततुरगा॥ निरालंबो मार्गश्चरणविकल: सा
रथिरपि॥ रविर्यात्येवांतं प्रतिदिनमपारस्य नभस:॥ क्रियासिद्धि: सत्वे वसति महतां नोपकरणे॥६॥ हस्ती स्थूलतनु: सचांकुशवश: किं ह
स्तिमात्रोंकुशो॥ दीपे प्रज्वलिते प्रणश्यति तम: किं दीपमात्रं तम:॥ वज्रेणाभिहता: पतंति गिरय: किं वज्रमात्रानग स्तेजो यस्य विराजते स ब
लवान् स्थूलेषु क: प्रत्यय:॥७॥ मनस्विभि: सदात्मा कंसत्वोद्योगपरायणै:॥ ६: साध्यान्यपि कार्याणि यत: सिध्यंति सत्वत:॥१॥ यथाऽर्जुनाय लंका
यानीत्वा सत्वाधिकश्रियं॥ सत्वेनावर्जित: स्वर्णकोमारहनुमानददौ॥२॥ तथाहि॥ हस्तिनागपुरं स्वास्तिरम्यमास्ति प्रसिद्धिभृत॥ कुरुक्षेत्रे पवित्रा ॥९॥
त्मा तत्र राजा युधिष्ठिर:॥३॥ ब्रल्पश्लोकतया सस वाचा च विदितोदय:॥ तेनान्यदा राजसत्याभिध: पारसताध्वर:॥४॥ तदा कुमारमानेतुमर्जुनं प्र
हितोर्जुन:॥ प्रस्थितो रथमास्थाय लंकां प्रसविलंबित:॥५॥ निर्विघ्नं धंसेतुबंधमिं– स्त्यविदाययौ॥ तावद्रथ: स्थिरीभूत: पदमेकं न गच्छ ॥सु॥
ति॥६॥ योवायुवेगादधिकं स्खलत्यास्खलित: सदा॥ स च स्खलेद्रथ: केन मामकीनो मनस्विना॥७॥ विशास्खलते हेतुं रथाध्व दतरस्तत:॥
अग्रत: पार्श्वतश्चापि पाषाणघं विलोकत॥८॥ व्याघातसहृशं किंचिद्यावदयेन पश्यति॥ रथं च परितस्ताव द्रष्टामास्त्रां तलोचन:॥९॥ ततोरथे
पराहृस्थितस्तेनाति कोमल:॥ मृणालतंतुवत्स्तस्तंतुरेकोनिरैक्ष्यत॥१०॥ अर्जुनो विस्मयस्मेर श्चिंतयामास चेतसि॥ अहो मम रथो नेन
तंतुनास्यापित: कथं॥११॥ ततस्तदेनं रुष्टात्मा प्राजनेन जघान स:॥ नोच्छिन्नस्तेन घातेन॥ सतंतुर्घनिसंहति:॥ सदोर्भ्यां त्रोटितुं लग्नस्तत:

सोद्यममानस:॥ नोच्छिराम्नामपिपरं त्राक्यते रवंडितुं यदा॥१३॥ तदा शस्त्रेणतीक्ष्णेन बलेन दृढमाहत:॥ नम्नं शस्त्रं परं तंतुस्तथाच च्छि
न्नएव स:॥१४॥ युग्मं॥ यावत्तालोकते तंतोर्मूलमुन्मूलने विचक्षि:॥ तावदेकं स्फुरत्पुच्छमुंदरं दृष्टवान सौ॥१५॥ वीक्ष्य चित्या रथंतत्र प्रच्छानिर्ग
ततं तुना॥ स्थितंतमिंद्रसू: प्रोचे कस्त्वमारवीमहावल:॥१६॥ कथं रथ: स्वमार्गेण गच्छन्मेस्खलितस्त्वया॥ स्वरूपं प्रकटीकृत्य कथ्यतां का
रणादिकं॥१७॥ क्षपिनोदिरमात्रेण स्खलत्यंते कस्यविद्रथ:॥ परं प्रस्तावीदे वादेर वद्रूपं संप्रवीक्ष्यं॥१८॥ यत:॥ यत्र मज्जंति निमज्जयंति च परांस्ते
रणादिकं॥१९॥ क्षपिनोदिरमात्रेण स्खलत्यंते कस्यविद्रथ:॥ परं प्रस्तावीदे वादेरवद्रूपं संप्रवीक्ष्यं॥ श्रीमद्दाशरथि: प्रतापमहि
प्रस्तराद्भूस्तरे॥ वार्धेर्वारितरंति वानरनरा न्संतारयंते पिच॥ नैते ग्रावगुणा न वारिधिगुणा नो वानराणां गुणा:॥ श्रीमद्दाशरथे: प्रतापमहि
मासोयं समुज्जृंभते॥२०॥ इत्यर्जुनश्च: श्रुत्वा मुपकस्तत्क्षणादपि॥ सत्कातद्रूपमकरोद्रूपं हनुमत: स्फुटं॥२०॥ सप्राहपांडवश्रेष्ठ
मासोयं समुज्जृंभते॥२०॥ इत्यर्जुनवच: श्रुत्वा मूषकस्तत्क्षणादपि॥ सत्कातद्रूपमकरोद्रूपं हनुमत: स्फुटं॥२०॥ सप्राहपांडवश्रेष्ठ
एक सर्वं मयास्थितं॥ अहं पवनपुत्रोऽस्मि रामदेवस्य सेवक:॥२१॥ यदाजहे सती सीता रावणेन दुरात्मना॥ तदायमुपलै: सेतुर्बंधोत्र
रविवानरै:॥२२॥ ससैन्यो राघवोनेन समुद्रमुदलंघयत॥ प्राप्य लंकां पुरीं नीत: पौलस्त्य: प्रेतसद्मनि॥२३॥ लंकाधिपत्ये संस्थाप्य वि
भीषणमुदारधी:॥ सीतासमन्वितो राम: स्वां पुरीं जग्मिवान्मुदा॥२४॥ तदादं रक्षको स्यात्र कृतो रामेण भूभुजा॥ मागच्छन्मानव: कोपि
पथाऽनेनेति हेतुना॥२५॥ त्वद्रथोयं मया स्थापित तोर्जुन यशोर्जुन॥ इच्छा प्रयास्तं माकार्षीर्लंकागमनहेतवे॥२६॥ इत्युक्तं मारुते: श्रु
त्वा सत्वाढ्य: प्राहपांडव:॥ सत्यमुक्तं महाभाग त्वया कपिकुलोत्तम॥२७॥ परं तथापि गंतव्यं लंकायां स्वर्णहेतवे॥ कृषीणां दक्षिणाध
र्थमहरेत द्विलोकय ॥२८॥ तवापि सुकृतस्यास्य विनागोभविता कपे॥ यत: प्राप्येत पुण्यांश: कृतानुमतिकारितै:॥२९॥ यत:॥ क
र्तु: स्वयं कारयितु: परेण तुष्टेन चित्तेन यथाऽनुमंतु॥ माहोय्यकर्तुश्च शुभाशुभेषु तुल्यं फलं तत्वविदो वदंति॥१॥ महासत्वै: समा
रब्धं कार्यं केन विहन्यते॥ येन केनाप्युपायेन तत्सिद्धिं नयमेव तै:॥३०॥ अनेन वचसा कुपस्तदा स पवनात्मज:॥ अहो पांडव कोटी
रगर्वस्ते ऽखर्वसंस्थिति:॥३१॥ श्रीरामोऽनेनमार्गेण गतो नान्यपरो नर:॥ गच्छ त्वमन्यमार्गेण शक्नोषि यदि पांडव॥३२॥ प्राहार्जुन: प्र
यास्यामित्वं मार्गस्यास्य रक्षक:॥ क्षेत्रपोहि निजं क्षेत्रं पाति नो सकलं जगत॥३३॥ ततोऽर्जुनेन कोदंडं कुंडलीकृत्य मार्गणै:॥ सेतुर्बंधो
नवश्चक्रे वज्रपद्याविजित्वर:॥३४॥ पावनिर्मानिनां मान्यस्तं सेतुं वीक्ष्य विस्मित:॥ पद्मयापि हृढता मस्येत वीक्षतां ऽवं प्रति॥३५॥ वि
लोकयेत्यनुत्तान: साक्षादिंद्रसुवातत:॥ समताल प्रमं रूपं वक्रेवक्रमना: कपि:॥३६॥ सेतोरुपरिवेगेन पापातीद्दीयन्हरिश:॥ शाला
यामिव नक्षापितवान्हदवत निर्मनाक॥३७॥ तद्गुणकौशलं वीक्ष्य वीक्षापन्न: सविस्मय:॥ साधुसाधु महासत्वेत्यवदद्वानराग्रणी॥३८
नवकार्यं सुवर्णेन लंकायां गमनेन वा॥ इत्युक्के कांचने नेतिप्रसुवाच रघोत्तम॥३९॥ ततोसो हनुमान् सम्यक सत्वेनावर्जित: कृणात॥

अर्पयामास कोमारं स्वर्णमानीय कोटिशः॥४०॥ तद्गृहीत्वा वरं प्राप स्वकीयमथ पांडुभूः॥ तेन स्वर्णेन सकलं कृतकार्यमजायत॥४१॥
एवं निस्सीमसत्वोद्यद्दीलासंवलितैर्गुणैः॥ सिद्धिं समीहितार्थस्य विलोक्य विवेकिभिः॥४२॥ सत्वप्रमुखे तास्तु गुणर्द्धिवर्द्धि
नोदया॥ अर्जनीयार्जुनेनेव पुरुपार्थप्रसिद्धये॥४३॥ युग्मं॥ सत्वमपि परनारी सहोदरव्रतसमुज्जीवितमेव। लोकोत्तम पुरुष
प्रतिष्ठाहेतुः। केवलसत्वमात्रं मिदं ब्राह्मणादीनामिव विवेकविकलत्वेन पशुपुरुषकारावहं॥ अतः पुरुषेण स्वात्मनः प्रति
ष्ठाधर्मार्जनाद्यभिवृद्धये॥ परनारीपराङ्मुखत्व मेव सेवनीयं॥ यतः॥ तावद्दत्तो कविलोचनामृतरसास्तावन्मनोवद्धिता स्तावदुर्म
महत्व सत्पविलसत्कीर्त्तिप्रतिशस्पदं॥ तावद्भूमिपति प्रसादनवनं तावच्छ्वसोज्ञास्पदं। यावन्नो परदारसंगरसिको लोकेन विन्ना
नवः॥१॥ तथाच॥ लंकायस्य पुरी त्रिकूट शिखरं ख्याता समुद्रश्च वा। उद्दैलः परिखा बुद्धिः स जगतो जेतांगमूर्दि प्रजित॥ अन्यस्त्री
परिरंसया कृतमना विद्यासदृशोर्जितः॥ सोपिप्रापगतप्रतापविलवोलं केश्वरस्तां दशां॥२॥ तथा॥ परिहरत परांगनाभिषंगं॥
यदि वत जीवितमस्ति वल्लभं वः॥ हरिहरि हरिणी दृशो निमित्तं दशदशकं धरमौलयो लुठंति॥२॥ स्वाधीनेऽपि कलत्रे नीचः
